Kāṇḍa - XVIII

अष्टादशं काण्डम्

अथाष्टादशं काण्डम् ॥

(१) प्रथमं सूक्तम्

(१–६१) एकषष्ट्यृचस्यास्य सूक्तस्याथर्वा ऋषिः। (१–३९, ४७–५०, ५३–६१) प्रथमाद्येकोनचत्वारिंशदृचां सप्तचत्वारिंश्याद्यृचतसृणां त्रिपञ्चाशत्यादिनवानाञ्च यमो मन्त्रोक्ताश्च, (४०) चत्वारिंश्या रुद्रः, (४१–४३) एकचत्वारिंश्यादितृचस्य सरस्वती, (४४–४६, ५१–५२) चतुश्चत्वारिंश्यादितृचस्यैकपञ्चाशीद्विपञ्चाश्योश्च पितरो देवताः। (१–७, ९–१३, १६–१७, २४–३३, ३९–४८, ५१–५५, ५८, ६०) प्रथमादिसप्तानां नवम्यादिपञ्चानां षोडशीसप्तदश्योश्चतुर्विंश्यादिदशानामेकोनचत्वारिंश्यादिदशानामेकपञ्चाशत्यादिपञ्चानामष्टपञ्चाशीषष्ट्योश्च त्रिष्टुप्, (८, १५) अष्टमीपञ्चदश्योरार्षी पङ्क्तिः, (१४, ४९–५०) चतुर्दश्येकोनपञ्चाशीपञ्चाशीनां भुरिक्त्रिष्टुप्, (१८–२३) अष्टादश्यादिषण्णां जगती, (३७–३८) सप्तत्रिंशदष्टात्रिंश्योः परोष्णिक्, (५६–५७, ६१) षट्पञ्चाशीसप्तपञ्चाश्येकषष्टीनामनुष्टुप्, (५९) एकोनषष्ट्याश्च पुरोबृहती छन्दांसि ॥

ओ चित्सखायं सख्या ववृत्यां तिरः पुरू चिदर्णवं जगन्वान्।
पितुर्नपातमा दधीत वेधा अधि क्षमि प्रतरं दीध्यानः ॥१॥
न ते सखा सख्यं वष्ट्येतत्सलक्ष्मा यद्विषुरूपा भवाति।
महस्पुत्रासो असुरस्य वीरा दिवो धर्तार उर्विया परि ख्यन् ॥२॥
उशन्ति घा ते अमृतास एतदेकस्य चित्त्यजसं मर्त्यस्य।
नि ते मनो मनसि धाय्यस्मे जन्युः पतिस्तन्व१मा विविश्याः ॥३॥
न यत्पुरा चकृमा कद्ध नूनमृतं वदन्तो अनृतं रपेम।
गन्धर्वो अप्स्वप्या च योषा सा नौ नाभिः परमं जामि तन्नौ ॥४॥

ओ इति। चित्। सखायम्। सख्या। ववृत्याम्। तिरः। पुरु। चित्। अर्णवम्। जगन्वान्। पितुः। नपातम्। आ। दधीत। वेधाः। अधि। क्षमि। प्रऽतरम्। दीध्यानः ॥

न। ते। सखा। सख्यम्। वष्टि। एतत्। सऽलक्ष्मा। यत्। विषुऽरूपा। भवाति। महः। पुत्रासः। असुरस्य। वीराः। दिवः। धर्तारः। उर्विया। परि। ख्यन् ॥ २ ॥

उशन्ति। घ। ते। अमृतासः। एतत्। एकस्य। चित्। त्यजसम्। मर्त्यस्य। नि। ते। मनः। मनसि। धायि। अस्मे इति। जन्युः। पतिः। तन्वम्। आ। विविश्याः ॥ ३ ॥

न। यत्। पुरा। चकृम। कत्। ह। नूनम्। ऋतम्। वदन्तः। अनृतम्। रपेम। गन्धर्वः। अप्ऽसु। अप्या। च। योषा। सा। नौ। नाभिः। परमम्। जामि। तत्। नौ ॥ ४ ॥

Yama

XVIII.1.1 Unto a friend would I turn with friendship; having gone through much ocean, may the pious one take a grandson of his father, considering further onward upon the earth.

XVIII.1.2 Thy friend wants not that friendship of thine, that she of like sign should become of diverse form; the sons of the great Asura, heroes, sustainers of the sky; look widely about.

XVIII.1.3 Truly those immortals want that – posterity of the one mortal; may thy mind be set in our mind; mayest thou enter (as) husband a wife's body.

XVIII.1.4 What we did not do formerly, why (do that) now ? Speaking righteousness, should we prate unrighteousness ? The Gandharva in the waters and the watery woman – that is our union, that our highest relation.

गर्भे नु नौ जनिता दंपती कर्देवस्त्वष्टा सविता विश्वरूपः ।
नकिरस्य प्र मिनन्ति व्रतानि वेद नावस्य पृथिवी उत द्यौः ॥५॥
को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।
आसन्निषून्हृत्स्वसो मयोभून्य एषां भृत्यामृणधत्स जीवात् ॥६॥
को अस्य वेद प्रथमस्याह्नः क ईं ददर्श क इह प्र वोचत् ।
बृहन्मित्रस्य वरुणस्य धाम कदु ब्रव आहनो वीच्या नॄन् ॥७॥
यमस्य मा यम्यं काम आगन्त्समाने योनौ सहशेय्याय ।
जायेव पत्ये तन्वं रिरिच्यां वि चिद्वृहेव रथ्येव चक्रा ॥८॥
न तिष्ठन्ति न नि मिषन्त्येते देवानां स्पश इह ये चरन्ति ।
अन्येन मदाहनो याहि तूयं तेन वि वृह रथ्येव चक्रा ॥९॥
रात्रीभिरस्मा अहभिर्दशस्येत्सूर्यस्य चक्षुर्मुहुरुन्मिमीयात् ।
दिवा पृथिव्या मिथुना सबन्धू यमीर्यमस्य विवृहादजामि ॥१०॥

गर्भे । नु । नौ । जनिता । दंपती इति दम्ऽपती । कः । देवः । त्वष्टा । सविता । विश्वऽरूपः ।
नकिः । अस्य । प्र । मिनन्ति । व्रतानि । वेद । नौ । अस्य । पृथिवी । उत । द्यौः ॥ ५ ॥

कः । अद्य । युङ्क्ते । धुरि । गाः । ऋतस्य । शिमीऽवतः । भामिनः । दुःऽहृणायून् ।
आसन्ऽइषून् । हृत्सुऽअसः । मयःऽभून् । यः । एषाम् । भृत्याम् । ऋणधत् । सः । जीवात् ॥६॥

कः । अस्य । वेद । प्रथमस्य । अह्नः । कः । ईम् । ददर्श । कः । इह । प्र । वोचत् ।
बृहत् । मित्रस्य । वरुणस्य । धाम । कत् । ऊं इति । ब्रवः । आहनः । वीच्या । नॄन् ॥ ७ ॥

यमस्य । मा । यम्यम् । कामः । आ । अगन् । समाने । योनौ । सहऽशेय्याय ।
जायाऽइव । पत्ये । तन्वम् । रिरिच्याम् । वि । चित् । वृहेव । रथ्याऽइव । चक्रा ॥८॥

न । तिष्ठन्ति । न । नि । मिषन्ति । एते । देवानाम् । स्पशः । इह । ये । चरन्ति ।
अन्येन । मत् । आहनः । याहि । तूयम् । तेन । वि । वृह । रथ्याऽइव । चक्रा ॥९॥

रात्रीभिः । अस्मै । अहऽभिः । दशस्येत् । सूर्यस्य । चक्षुः । मुहुः । उत् । मिमीयात् ।
दिवा । पृथिव्या । मिथुना । सबन्धू इति सऽबन्धू । यमीः । यमस्य । विवृहात् । अजामि ॥

XVIII.1.5 Verily, the generator made us in the womb man and spouse - - god Tvaṣṭar, Savitar of all forms; none overthrow his ordinances; earth knows us (two) as such, also heaven.

XVIII.1.6 Who yokes to the pole today the kine of righteousness, the diligent, the bright, the slow to wrath, that have arrows in the mouth, that shoot at the heart, amiable ones ? Whoso shall prosper their burden, he shall live.

XVIII.1.7 Who knows of that first day ? Who saw it ? Who shall proclaim it here ? Great is the ordinance of Mitra, of Varuṇa; why, O lustful one, wilt thou speak to men with deceit.

XVIII.1.8 Desire of Yama had come unto me Yamī, in order to lying together in the same lair I would fain yield my body, as wife to husband; may we whirl off, like two chariot wheels.

XVIII.1.9 They stand not, they wink not, those spies of the gods who go about here; with another than me, O lustful one, go quickly; with him whirl off like two chariot wheels.

XVIII.1.10 By nights, by days one may pay reverence to him; the sun's eye may open for a moment; with heaven, with earth paired of near connection;—Yamī must bear the unbrotherly (conduct) of Yama.

आ घा ता गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामि ।
उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत् ॥११॥
किं भ्रातासद्यदनाथं भवाति किमु स्वसा यन्निर्ऋतिर्निगच्छात् ।
काममूता बह्वे३तद्रपामि तन्वा३ मे तन्वं१ सं पिपृग्धि ॥१२॥
न ते नाथं यम्यत्राहमस्मि न ते तनूं तन्वा३ सं पपृच्याम् ।
अन्येन मत्प्रमुदः कल्पयस्व न ते भ्राता सुभगे वष्ट्येतत् ॥१३॥
न वा उ ते तनूं तन्वा३ सं पपृच्यां पापमाहुर्यः स्वसारं निगच्छात् ।
असंयदेतन्मनसो हृदो मे भ्राता स्वसुः शयने यच्छयीय ॥१४॥
बतो बतासि यम नैव ते मनो हृदयं चाविदाम ।
अन्या किल त्वां कक्ष्ये३व युक्तं परि ष्वजातै लिबुजेव वृक्षम् ॥१५॥
अन्य ऊ षु यम्यन्य उ त्वां परि ष्वजातै लिबुजेव वृक्षम् ।
तस्य वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्राम् ॥१६॥

आ । घ । ता । गच्छान् । उत्ऽतरा । युगानि । यत्र । जामयः । कृणवन् । अजामि ।
उप । बर्बृहि । वृषभाय । बाहुम् । अन्यम् । इच्छस्व । सुऽभगे । पतिम् । मत् ॥ ११ ॥

किम् । भ्राता । असत् । यत् । अनाथम् । भवाति । किम् । ऊं इति । स्वसा । यत् । निःऽऋतिः ।
निऽगच्छात् । कामऽमूता । बहु । एतत् । रपामि । तन्वा । मे । तन्वम् । सम् । पिपृग्धि ॥

न । ते । नाथम् । यमि । अत्र । अहम् । अस्मि । न । ते । तनूम् । तन्वा । सम् ।
पपृच्याम् । अन्येन । मत् । प्रऽमुदः । कल्पयस्व । न । ते । भ्राता । सुऽभगे । वष्टि । एतत् ॥

न । वै । ऊं इति । ते । तनूम् । तन्वा । सम् । पपृच्याम् । पापम् । आहुः । यः ।
स्वसारम् । निऽगच्छात् । असम्ऽयत् । एतत् । मनसः । हृदः । मे । भ्राता । स्वसुः ।
शयने । यत् । शयीय ॥ १४ ॥

बतः । बत । असि । यम । न । एव । ते । मनः । हृदयम् । च । अविदाम । अन्या ।
किल । त्वाम् । कक्ष्याऽइव । युक्तम् । परि । स्वजाते । लिबुजाऽइव । वृक्षम् ॥ १५ ॥

अन्यम् । ऊं इति । सु । यमि । अन्यः । ऊं इति । त्वाम् । परि । स्वजाते । लिबुजाऽइव ।
वृक्षम् । तस्य । वा । त्वम् । मनः । इच्छ । सः । वा । तव । अध । कृणुष्व । समऽविदम् । सुऽभद्राम् ॥

XVIII.1.11 Verily there shall come those later ages in which next of kin shall do what is unkinly. Put thine arm underneath a hero; seek, O fortunate one, another husband.

XVIII.1.12 What should brother be when there is no protector ? or what sister, when destruction impends ? Impelled by desire, I prate thus much; mingle thou thy body with my body.

XVIII.1.13 I am not thy protector here, O Yamī; I may not mingle my body with thy body; with another than me do thou prepare enjoyments: thy brother wants not that, O fortunate one.

XVIII.1.14 Verily, I may not mingle my body with thy body; they call him wicked who should approach his sister. That is not consonant with my mind (and) heart, that I, a brother, should lie in a sister's bed (śayana).

XVIII.1.15 A weakling, alas, art thou, O Yama; we have not found mind and heart thine; verily, another woman shall embrace thee, as a girth a harnessed (horse), as twining plant a tree.

XVIII.1.16 Another man, truly, O Yamī, another man shall embrace thee, as twining plant a tree; either do thou seek his mind or he thine; then make for thyself very excellent concord.

त्रीणि च्छन्दांसि कवयो वि येतिरे पुरुरूपं दर्शतं विश्वचक्षणम् ।
आपो वाता ओषधयस्तान्येकस्मिन्भुवन आर्पितानि ॥१७॥
वृषा वृष्णे दुदुहे दोहसा दिवः पयांसि यह्वो अदितेरदाभ्यः ।
विश्वं स वेद वरुणो यथा धिया स यज्ञियो यजति यज्ञियाँ ऋतून् ॥१८॥
रपद्गन्धर्वीरप्या च योषणा नदस्य नादे परि पातु नो मनः ।
इष्टस्य मध्ये अदितिर्नि धातु नो भ्राता नो ज्येष्ठः प्रथमो वि वोचति ॥१९॥
सो चिन्नु भद्रा क्षुमती यशस्वत्युषा उवास मनवे स्वर्वती ।
यदीमुशन्तमुशतामनु क्रतुमग्निं होतारं विदथाय जीजनन् ॥२०॥
अध त्यं द्रप्सं विभ्वं विचक्षणं विराभरदिषिरः श्येनो अध्वरे ।
यदी विशो वृणते दस्ममार्या अग्निं होतारमध धीरजायत ॥२१॥
सदासि रण्वो यवसेव पुष्यते होत्राभिरग्ने मनुषः स्वध्वरः ।
विप्रस्य वा यच्छशमान उक्थ्यो३ वाजं ससवाँ उपयासि भूरिभिः ॥२२॥

त्रीणि । छन्दांसि । कवयः । वि । येतिरे । पुरुऽरूपम् । दर्शतम् । विश्वऽचक्षणम् ।
आपः । वाताः । ओषधयः । तानि । एकस्मिन् । भुवने । आर्पितानि ॥ १७ ॥

वृषा । वृष्णे । दुदुहे । दोहसा । दिवः । पयांसि । यह्वः । अदितिः । अदाभ्यः ।
विश्वम् । सः । वेद । वरुणः । यथा । धिया । सः । यज्ञियः । यजति । यज्ञियान् । ऋतून् ॥ १८ ॥

रपत् । गन्धर्वीः । अप्या । च । योषणा । नदस्य । नादे । परि । पातु । नः । मनः । इष्टस्य ।
मध्ये । अदितिः । नि । धातु । नः । भ्राता । नः । ज्येष्ठः । प्रथमः । वि । वोचति ॥१९ ॥

सो इति । चित् । नु । भद्रा । क्षुऽमती । यशस्वती । उषाः । उवास । मनवे । स्वःऽवती ।
यत् । ईम् । उशन्तम् । उशताम् । अनु । क्रतुम् । अग्निम् । होतारम् । विदथाय । जीजनन् ॥

अध । त्यम् । द्रप्सम् । विऽभ्वम् । विऽचक्षणम् । विः । आ । अभरत् । इषिरः । श्येनः ।
अध्वरे । यदि । विशः । वृणते । दस्मम् । आर्याः । अग्निम् । होतारम् । अध । धीः । अजायत ॥

सदा । असि । रण्वः । यवसाऽइव । पुष्यते । होत्राभिः । अग्ने । मनुषः । सुऽअध्वरः ।
विप्रस्य । वा । यत् । शशमानः । उक्थ्यः । वाजम् । ससऽवान् । उपऽयासि । भूरिऽभिः ॥ २२ ॥

Agni

XVIII.1.17 Three meters the poets extended – the many -formed one, the admirable, the all-beholding; water, winds, herbs – these are set in one being (bhuvana).

XVIII.1.18 The bull yieldeth milks for the bull with the milking of the sky, he the unharmable son of Aditi; everything knoweth he, like Varuna, by thought; he, sharing the sacrifice sacrificeth to the seasons that share the sacrifice.

XVIII.1.19 Prateth the Gandharvī and watery woman; in the noise of the noisy one let (her) protect our mind; let Aditi set us in the midst of what is desired; our oldest brother shall first speak out.

XVIII.1.20 She now, the excellent, rich in food, full of glory – the dawn hath shone for man full of light; since they have generated for the council (as) hotr Agni, the eager one, after the will of the eager ones.

XVIII.1.21 Then that mighty conspicuous drop did the bird, the lively falcon, bring at the sacrifice; if the Aryan tribes choose the wondrous one; Agni, then prayer was born.

XVIII.1.22 Ever art thou pleasant, as pastures to him that enjoys them, being, O Agni, well sacrificed to with the offerings of man; or when, active, praiseworthy, having won the strength of the inspired one, thou approaches with very many.

उदीरय पितरा जार आ भगमियक्षति हर्यतो हृत्त इष्यति ।
विवक्ति वह्निः स्वपस्यते मखस्तविष्यते असुरो वेपते मती ॥२३॥
यस्ते अग्ने सुमतिं मर्तो अख्यत्सहसः सूनो अति स प्र शृण्वे ।
इषं दधानो वहमानो अश्वैरा स द्युमाँ अमवान्भूषति द्यून् ॥२४॥
श्रुधी नो अग्ने सदने सधस्थे युक्ष्वा रथममृतस्य द्रवित्नुम् ।
आ नो वह रोदसी देवपुत्रे माकिर्देवानामप भूरिह स्याः ॥२५॥
यदग्न एषा समितिर्भवाति देवी देवेषु यजता यजत्र ।
रत्ना च यद्विभजासि स्वधावो भागं नो अत्र वसुमन्तं वीतात् ॥२६॥
अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः ।
अनु सूर्य उषसो अनु रश्मीननु द्यावापृथिवी आ विवेश ॥२७॥
प्रत्यग्निरुषसामग्रमख्यत्प्रत्यहानि प्रथमो जातवेदाः ।
प्रति सूर्यस्य पुरुधा च रश्मीन्प्रति द्यावापृथिवी आ ततान ॥२८॥

उत् । ईरय । पितरा । जारः । आ । भगम् । इयक्षति । हर्यतः । हृत्तः । इष्यति ।
विवक्ति । वह्निः । सुऽअपस्यते । मखः । तविष्यते । असुरः । वेपते । मती ॥ २३ ॥
यः । ते । अग्ने । सुऽमतिम् । मर्तः । अख्यत् । सहसः । सूनो इति । अति । सः । प्र ।
शृण्वे । इषम् । दधानः । वहमानः । अश्वैः । आ । सः । द्युऽमान् । अमऽवान् । भूषति । द्यून् ॥
श्रुधि । नः । अग्ने । सदने । सधऽस्थे । युक्ष्व । रथम् । अमृतस्य । द्रवित्नुम् । आ ।
नः । वह । रोदसी इति । देवपुत्रे इति देवऽपुत्रे । माकिः । देवानाम् । अप । भूः । इह । स्याः ॥
यत् । अग्ने । एषा । समऽइतिः । भवाति । देवी । देवेषु । यजता । यजत्र । रत्ना । च ।
यत् । विऽभजासि । स्वधाऽवः । भागम् । नः । अत्र । वसुऽमन्तम् । वीतात् ॥ २६ ॥
अनु । अग्निः । उषसाम् । अग्रम् । अख्यत् । अनु । अहानि । प्रथमः । जातऽवेदाः । अनु ।
सूर्यः । उषसः । अनु । रश्मीन् । अनु । द्यावापृथिवी इति । आ । विवेश ॥ २७ ॥
प्रति । अग्निः । उषसाम् । अग्रम् । अख्यत् । प्रति । अहानि । प्रथमः । जातऽवेदाः । प्रति ।
सूर्यस्य । पुरुऽधा । च । रश्मीन् । प्रति । द्यावापृथिवी इति । आ । ततान ॥ २८ ॥

XVIII.1.23 **Send thou up the** (two) fathers, (as) a lover, unto enjoyment. The welcome one desires to sacrifice; he sends from the heart; the bearer speaks out; the merry one does a good work; the Asura shows might; he trembles with purpose.

XVIII.1.24 Whatever mortal hath seen thy favor, O Agni son of power, he is renowned exceedingly; acquiring food, borne by horses, he lightful vigorous, passes the days.

XVIII.1.25 Hear us, O Agni, in thy seat, thy station; harness the speedy chariot of the immortal; bring to us the two firmaments, parents of the gods be thou of gods never away; mayest thou be here.

XVIII.1.26 That, O Agni, this meeting may take place, divine, among the gods, worshipful, thou reverend one, and that thou mayest share out treasures, O self-ruling one, do thou enjoy here our portion filled with good things. [Also Rg X.II.8]

Agni

XVIII.1.27 Agni hath looked after the apex of the dawns, after the days, (he) first, Jātavedas; a sun, after the dawns, after the rays; after heaven-and earth he entered.

XVIII.1.28 Agni hath looked forth to meet the apex of the dawns, to meet the days, (he) first, Jātavedas, and to meet the rays of the sun in many places; to meet heaven and earth he stretched out.

द्यावा ह क्षामा प्रथमे ऋतेनाभिश्रावे भवतः सत्यवाचा ।
देवो यन्मर्तान्यजथाय कृण्वन्त्सीदद्धोता प्रत्यङ् स्वमसुं यन् ॥२९॥
देवो देवान्परिभूर्ऋतेन वहा नो हव्यं प्रथमश्चिकित्वान् ।
धूमकेतुः समिधा भाऋजीको मन्द्रो होता नित्यो वाचा यजीयान् ॥३०॥ (१)
अर्चामि वां वर्धायापो घृतस्नू द्यावाभूमी शृणुतं रोदसी मे ।
अहा यद्देवा असुनीतिमायन्मध्वा नो अत्र पितरा शिशीताम् ॥३१॥
स्वावृग्देवस्यामृतं यदी गोरतो जातासो धारयन्त उर्वी ।
विश्वे देवा अनु तत्ते यजुर्गुर्दुहे यदेनी दिव्यं घृतं वाः ॥३२॥
किं स्विन्नो राजा जगृहे कदस्याति व्रतं चकृमा को वि वेद ।
मित्रश्चिद्धि ष्मा जुहुराणो देवाञ्छ्लोको न यातामपि वाजो अस्ति ॥३३॥
दुर्मन्त्वत्रामृतस्य नाम सलक्ष्मा यद्विषुरूपा भवाति ।
यमस्य यो मनवते सुमन्त्वग्ने तमृष्व पाह्यप्रयुच्छन् ॥३४॥

द्यावा । ह । क्षामा । प्रथमे इति । ऋतेन । अभिऽश्रावे । भवतः । सत्यऽवाचा । देवः । यत् । मर्तान् । यजथाय । कृण्वन् । सीदत् । होता । प्रत्यङ् । स्वम । असुम् । यन् ॥ २९ ॥

देवः । देवान् । परिऽभूः । ऋतेन । वह । नः । हव्यम् । प्रथमः । चिकित्वान् । धूमऽकेतुः । सम्ऽइधा । भाःऽऋजीकः । मन्द्रः । होता । नित्यः । वाचा । यजीयान् ॥ ३० ॥

अर्चामि । वाम् । वर्धाय । अपः । घृतस्नू इति घृतऽस्नू । द्यावाभूमी इति । शृणुतम् । रोदसी इति । मे । अहा । यत् । देवाः । असुऽनीतिम् । आयन् । मध्वा । नः । अत्र । पितरा । शिशीताम् ॥ ३१ ॥

स्वावृक् । देवस्य । अमृतम । यदि । गोः । अतः । जातासः । धारयन्ते । उर्वी इति । विश्वे । देवाः । अनु । तत् । ते । यजुः । गुः । दुहे । यत् । एनी । दिव्यम् । घृतम् । वाः ॥

किम् । स्वित् । नः । राजा । जगृहे । कत् । अस्य । अति । व्रतम् । चकृम । कः । वि । वेद । मित्रः । चित् । हि । स्म । जुहुराणः । देवान् । श्लोकः । न । याताम । अपि । वाजः । अस्ति ॥ ३३ ॥

दुःऽमन्तु । अत्र । अमृतस्य । नाम । सऽलक्ष्मा । यत् । विषुऽरूपा । भवाति । यमस्य । यः । मनवते । सुऽमन्तु । अग्ने । तम् । ऋष्व । पाहि । अप्रऽयुच्छन् ॥ ३४ ॥

XVIII.1.29 Heaven and earth, first by right, truth-speaking are within hearing, when the god, making mortals to sacrifice, sits as hotr, going to meet his own being. [Also Rg X.12.1]

XVIII.1.30 A God, encompassing the gods with right, carry thou first our offering, understanding (it); smoke-bannered by the fuel, light-beaming, a pleasant, constant hotr, skilled sacrificer with speech. [Also Rg X.12.2]

XVIII.1.31 I praise your work unto increase, ye ghee-surfaced ones; O heaven and earth, hear me, ye two firmaments; when days, O gods, went to the other life; let the two parents sharpen us here with honey. [Also Rg X.12.4]

XVIII.1.32 If the god's immortality is easy to appropriate for the cow, thence those who are born maintain themselves on the broad (earth); all the gods go after that sacrificial formula of thine, when the hind yields the ghee, heavenly liquor. [Also Rg X.12.3].

XVIII.1.33 Why forsooth hath the king seized us ? What have we done in transgression of his ordinance? who discerns (it)? for even Mitra, swerving the gods, like a song of praise, is the might also of them that go. [Also Rg X.12.5]

XVIII.1.34 Hard to reverence here is the name of the immortal, that she of like sign should become of diverse form; whoso shall reverence, him O Agni, exalted one, do thou protect, unremitting. [Also Rg X.12.6]

यस्मिन्देवा विदथे मादयन्ते विवस्वतः सदने धारयन्ते ।
सूर्ये ज्योतिरदधुर्मास्य१क्तून्परि द्योतनिं चरतो अजस्रा ॥३५॥
यस्मिन्देवा मन्मनि संचरन्त्यपीच्ये३ न वयमस्य विद्म ।
मित्रो नो अत्रादितिरनागान्त्सविता देवो वरुणाय वोचत् ॥३६॥
सखाय आ शिषामहे ब्रह्मेन्द्राय वज्रिणे ।
स्तुष ऊ षु नृतमाय धृष्णवे ॥३७॥
शवसा ह्यसि श्रुतो वृत्रहत्येन वृत्रहा ।
मघैर्मघोनो अति शूर दाशसि ॥३८॥
स्तेगो न क्षामत्येषि पृथिवीं मही नो वाता इह वान्तु भूमौ ।
मित्रो नो अत्र वरुणो युज्यमानो अग्निर्वने न व्यसृष्ट शोकम् ॥३९॥
स्तुहि श्रुतं गर्तसदं जनानां राजानं भीममुपहत्नुमुग्रम् ।
मृडा जरित्रे रुद्र स्तवानो अन्यमस्मत्ते नि वपन्तु सेन्यम् ॥४०॥ (७)

यस्मिन् । देवाः । विदथे । मादयन्ते । विवस्वतः । सदने । धारयन्ते । सूर्ये ।
ज्योतिः । अदधुः । मासि । अक्तून् । परि । द्योतनिम् । चरतः । अजस्रा ॥ ३५ ॥
यस्मिन् । देवाः । मन्मनि । सम्ऽचरन्ति । अपीच्ये३ । न । वयम् । अस्य । विद्म ।
मित्रः । नः । अत्र । अदितिः । अनागान् । सविता । देवः । वरुणाय । वोचत् ॥ ३६ ॥
सखायः । आ । शिषामहे । ब्रह्म । इन्द्राय । वज्रिणे ।
स्तुषे । ऊं इति । सु । नृऽतमाय । धृष्णवे ॥ ३७ ॥
शवसा । हि । असि । श्रुतः । वृत्रऽहत्येन । वृत्रऽहा । मघैः । मघोनः । अति । शूर । दाशसि ॥३८॥
स्तेगः । न । क्षाम् । अति । एषि । पृथिवीम् । मही इति । नः । वाताः । इह । वान्तु ।
भूमौ । मित्रः । नः । अत्र । वरुणः । युज्यमानः । अग्निः । वने । न । वि । असृष्ट । शोकम् ॥
स्तुहि । श्रुतम् । गर्तऽसदम् । जनानाम् । राजानम् । भीमम् । उपऽहत्नुम् । उग्रम् ।
मृड । जरित्रे । रुद्र । स्तवानः । अन्यम् । अस्मत् । ते । नि । वपन्तु । सेन्यम् ॥ ४० ॥

XVIII.1.35 In whom the gods revel at the council, maintain themselves in Vivasvant's seat – they placed light in the sun, rays in the moon: the unfailing, wait upon the brightness. [Also Ṛg X.12.7]

XVIII.1.36 In what secret devotion the gods go about – we know it not; may Mitra; may Aditi, may god Savitar declare us here guiltless to Varuṇa. [Also Ṛg.X.12.8]

Indra

XVIII.1.37 O companions, we would supplicate worship for Indra, possessor of the thunderbolt, to praise indeed, the most manly, the daring. [Also Ṛg. VIII.24.1]

XVIII.1.38 For thou art famed for might, for Vṛtra-slaying, a Vrtra slayer; thou out-bestowest the bounteous with thy bounties, O hero. [Also Ṛg.VIII.24.2]

XVIII.1.39 Thou goest over the earth as a steg over the ground; let winds blow here on the great earth for us; Mitra for us there (atra), Varuṇa, being joined, hath let loose heat, as fire does in the forest.

Rudra

XVIII.1.40 Praise thou the famed sitter on the hollow of men, the terrible king, formidable assailant; being praised, O Rudra, be gracious to the singer; let thine army lay low another than us. [Also Ṛg II.33.11]

सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने ।
सरस्वतीं सुकृतो हवन्ते सरस्वती दाशुषे वार्यं दात् ॥४१॥
सरस्वतीं पितरो हवन्ते दक्षिणा यज्ञमभिनक्षमाणाः ।
आसद्यास्मिन्बर्हिषि मादयध्वमनमीवा इष आ धेह्यस्मे ॥४२॥
सरस्वति या सरथं ययाथोक्थैः स्वधाभिर्देवि पितृभिर्मदन्ती ।
सहस्रार्घमिडो अत्र भागं रायस्पोषं यजमानाय धेहि ॥४३॥
उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः ।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥४४॥
आहं पितॄन्त्सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः ॥४५॥
इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो ये अपरास ईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु दिक्षु ॥४६॥

सरस्वतीम् । देवऽयन्तः । हवन्ते । सरस्वतीम् । अध्वरे । तायमाने ।
सरस्वतीम् । सुऽकृतः । हवन्ते । सरस्वती । दाशुषे । वार्यम् । दात् ॥ ४१ ॥

सरस्वतीम् । पितरः । हवन्ते । दक्षिणा । यज्ञम् । अभिऽनक्षमाणाः । आऽसद्य । अस्मिन् ।
बर्हिषि । मादयध्वम् । अनमीवाः । इषः । आ । धेहि । अस्मे इति ॥ ४२ ॥

सरस्वति । या । सऽरथम् । ययाथ । उक्थैः । स्वधाभिः । देवि । पितृऽभिः । मदन्ती ।
सहस्रऽअर्घम् । इडः । अत्र । भागम् । रायः । पोषम् । यजमानाय । धेहि ॥ ४३ ॥

उत् । ईरताम् । अवरे । उत् । परासः । उत् । मध्यमाः । पितरः । सोम्यासः ।
असुम् । ये । ईयुः । अवृकाः । ऋतऽज्ञाः । ते । नः । अवन्तु । पितरः । हवेषु ॥ ४४ ॥

आ । अहम् । पितॄन् । सुऽविदत्रान् । अवित्सि । नपातम् । च । विऽक्रमणम् । च ।
विष्णोः । बर्हिऽसदः । ये । स्वधया । सुतस्य । भजन्त । पित्वः । ते । इह । आऽगमिष्ठाः ॥

इदम् । पितृऽभ्यः । नमः । अस्तु । अद्य । ये । पूर्वासः । ये अपरासः । ईयुः । ये ।
पार्थिवे । रजसि । आ । निऽसत्ताः । ये । वा । नूनम् । सुऽवृजनासु । दिक्षु ॥ ४६ ॥

Sarasvatī

XVIII.1.41 On Sarasvatī do the pious call; on Sarasvatī, while the sacrifice is being extended; on Sarasvatī do the well-doers call: may Sarasvatī give what is desirable to the worshiper.

XVIII.1.42 On Sarasvatī do the Fathers call, arriving at the sacrifice on the south; sitting on this barhis do ye revel; assign thou to us food free from disease.

XVIII.1.43 O Sarasvatī, that wentest in company with the songs, with the svadhas, O goddess, reveling with the Fathers, assign thou to the sacrificer here a portion of refreshment of thousandfold value, abundance of wealth.

Pitaraḥ : Fathers

XVIII.1.44 Let the lower, let the higher, let the midmost Fathers, the soma drinking, go up, they who went to life, unharmed, right-knowing — let those Fathers aid us at our calls. [Ṛg X.15.1]

XVIII.1.45 I have won hither the beneficent Fathers, both the grandson and the wide-striding of Viṣṇu; they who, sitting on the barhis, partake of the pressed drink with svadha - they come especially hither. [Also Ṛg.X.15.3]

XVIII.1.46 Be this homage today to the Fathers, who went first, who went after, who are seated in the space of earth, or who are now in region, having good abodes. [Also Ṛg.X.15.2]

मातली कव्यैर्यमो अङ्गिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः ।
यांश्च देवा वावृधुर्ये च देवांस्ते नोऽवन्तु पितरो हवेषु ॥४७॥
स्वादुष्किलायं मधुमाँ उतायं तीव्रः किलायं रसवाँ उतायम् ।
उतो न्व१स्य पपिवांसमिन्द्रं न कश्चन सहत आहवेषु ॥४८॥
परेयिवांसं प्रवतो महीरिति बहुभ्यः पन्थामनुपस्पशानम् ।
वैवस्वतं संगमनं जनानां यमं राजानं हविषा सपर्यत ॥४९॥
यमो नो गातुं प्रथमो विवेद नैषा गव्यूतिरपभर्तवा उं ।
यत्रा नः पूर्वे पितरः परेता एना जज्ञानाः पथ्या३ अनु स्वाः ॥५०॥
बर्हिषदः पितर ऊत्य१र्वागिमा वो हव्या चकृमा जुषध्वम् ।
त आ गतावसा शंतमेनाधा नः शं योररपो दधात ॥५१॥
आच्या जानु दक्षिणतो निषद्येदं नो हविरभि गृणन्तु विश्वे ।
मा हिंसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता कराम ॥५२॥

मातली । कव्यैः । यमः । अङ्गिरःऽभिः । बृहस्पतिः । ऋक्वऽभिः । ववृधानः । यान् ।
च । देवाः । ववृधुः । ये । च । देवान् । ते । नः । अवन्तु । पितरः । हवेषु ॥ ४७ ॥
स्वादुः । किल । अयम् । मधुऽमान् । उत । अयम् । तीव्रः । किल । अयम् । रसऽवान् ।
उत । अयम् । उतो इति । नु । अस्य । पपिऽवांसम् । इन्द्रम् । न । कः । चन । सहते । आऽहवेषु ॥
परेयिऽवांसम् । प्रऽवतः । महीः । इति । बहुऽभ्यः । पन्थाम् । अनुऽपस्पशानम् ।
वैवस्वतम् । सम्ऽगमनम् । जनानाम् । यमम् । राजानम् । हविषा । सपर्यत ॥ ४९ ॥
यमः । नः । गातुम् । प्रथमः । विवेद । न । एषा । गव्यूतिः । अपऽभर्तवै । ऊं इति ।
यत्र । नः । पूर्वे । पितरः । पराऽइताः । एना । जज्ञानाः । पथ्याः । अनु । स्वाः ॥५०॥
बर्हिऽसदः । पितरः । ऊती । अर्वाक् । इमा । वः । हव्या । चकृम । जुषध्वम् ।
ते । आ । गत । अवसा । शम्ऽतमेन । अध । नः । शम् । योः । अरपः । दधात ॥५१॥
आऽअच्य । जानु । दक्षिणतः । निऽसद्य । इदम् । नः । हविः । अभि । गृणन्तु । विश्वे ।
मा । हिंसिष्ट । पितरः । केन । चित् । नः । यत् । वः । आगः । पुरुषता । कराम ॥५२॥

Yama

XVIII.1.47 Mātali with the kavās, Yama with the Añgirases, Bṛhaspatī increasing with the ṛkvans (praisers); both they whom the gods increased and who (increased) the gods — let those Fathers aid us at our calls. [Rg X.14.3.Var.]

Soma

XVIII.1.48 Sweet verily is this (Soma), and full of honey is this; strong verily is this, and full of sap is this; and no one soever overpowers in conflicts Indra, having now drunk of it. [Rg.VI.47.1]

Yama

XVIII.1.49 Him that went away to the advances called great, spying out the road for many, Vivasvant's son, gatherer of people, king Yama, honor ye with oblation.

XVIII.1.50 Yama first found for us a track; that is not a pasture to be borne away; where our former Fathers went forth, there (go) those born (of them), along their own roads.

Pitaraḥ

XVIII.1.51 Ye barhis-seated Fathers, hitherward with aid; these offerings have we made for you; enjoy (them) do ye come with most wealful aid; then assign to us weal (and) profit, free from evil.

XVIII.1.52 Bending the knee, sitting down on the right, let all assent to this libation of ours; injure us not, O Fathers, by reason of any offense which we may do to you through humanity.

त्वष्टा दुहित्रे वहतुं कृणोति तेनेदं विश्वं भुवनं समेति ।
यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश ॥५३॥
प्रेहि प्रेहि पथिभिः पूर्याणैर्येना ते पूर्वे पितरः परेताः ।
उभा राजानौ स्वधया मदन्तौ यमं पश्यासि वरुणं च देवम् ॥५४॥
अपेत वीत वि च सर्पतातोऽस्मा एतं पितरो लोकमक्रन् ।
अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्यवसानमस्मै ॥५५॥
उशन्तस्त्वेधीमह्युशन्तः समिधीमहि ।
उशन्नुशत आ वह पितॄन्हविषे अत्तवे ॥५६॥
द्युमन्तस्त्वेधीमहि द्युमन्तः समिधीमहि ।
द्युमान्द्युमत आ वह पितॄन्हविषे अत्तवे ॥५७॥
अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥५८॥

त्वष्टा । दुहित्रे । वहतुम् । कृणोति । तेन । इदम् । विश्वम् । भुवनम् । सम् । एति ।
यमस्य । माता । परिऽउह्यमाना । महः । जाया । विवस्वतः । ननाश ॥ ५३ ॥
प्र । इहि । प्र । इहि । पथिऽभिः । पूःऽयानैः । येन । ते । पूर्वे । पितरः । पराऽइताः ।
उभा । राजानौ । स्वधया । मदन्तौ । यमम् । पश्यासि । वरुणम् । च । देवम् ॥ ५४ ॥
अप । इत । वि । इत । वि । च । सर्पत । अतः । अस्मै । एतम् । पितरः । लोकम् ।
अक्रन् । अहःऽभिः । अत्ऽभिः । अक्तुऽभिः । विऽअक्तम् । यमः । ददाति । अवऽसानम् । अस्मै ॥
उशन्तः । त्वा । इधीमहि । उशन्तः । सम् । इधीमहि ।
उशन् । उशतः । आ । वह । पितॄन् । हविषे । अत्तवे ॥ ५६ ॥
द्युऽमन्तः । त्वा । इधीमहि । द्युऽमन्तः । सम् । इधीमहि ।
द्युऽमान् । द्युऽमतः । आ । वह । पितॄन् । हविषे । अत्तवे ॥ ५७ ॥
अङ्गिरसः । नः । पितरः । नवऽग्वाः । अथर्वाणः । भृगवः । सोम्यासः ।
तेषाम् । वयम् । सुऽमतौ । यज्ञियानाम् । अपि । भद्रे । सौमनसे । स्याम ॥ ५८ ॥

Tvaṣṭar

XVIII.1.53 Tvaṣṭar makes a wedding-car for his daughter; by reason of this, all this creation comes together; the mother of Yama, wife of great Vivasvant, being drawn about, disappeared.

XVIII.1.54 Go thou forth, go forth by roads that go to the stronghold, as thy Fathers of old went forth; both kings, reveling with svadha, shall thou see, Yama and god Varuna.

XVIII.1.55 Go ye away, go asunder, and creep apart from here; for this man the Fathers have made this world; adorned with days, with waters, with rays, a rest Yama gives to him. [Also Ṛg.X.14.9]

XVIII.1.56 Eager would we light thee, eager would we kindle; do thou, eager, bring the eager Gathers to eat the oblation.

XVIII.1.57 Lightful would we light thee, lightfull would we kindle; do thou, lightful, bring the lightful Fathers to eat the oblation.

To Yama and Fathers

XVIII.1.58 The Añgirases, our navagva Fathers, the Atharvans, the Bhṛgus, soma-drinkers — may we be in the favor of those worshipful ones, likewise in their excellent well-willing. [Ṛg.X.14.6]

अङ्गिरोभिर्यज्ञियैरा गहीह यम वैरूपैरिह मादयस्व ।
विवस्वन्तं हुवे यः पिता तेऽस्मिन्बर्हिष्या निषद्य ॥५९॥
इमं यम प्रस्तरमा हि रोहाङ्गिरोभिः पितृभिः संविदानः ।
आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन्हविषो मादयस्व ॥६०॥
इत एत उदारुहन्दिवस्पृष्ठान्यारुहन् ।
प्र भूर्जयो यथा पथा द्यामङ्गिरसो ययुः ॥६१॥ (५)

अङ्गिरःऽभिः । यज्ञियैः । आ । गहि । इह । यम । वैरूपैः । इह । मादयस्व ।
विवस्वन्तम् । हुवे । यः । पिता । ते अस्मिन् । बर्हिषि । आ । निऽसद्य ॥ ५९ ॥
इमम् । यम । प्रऽस्तरम् । आ । हि । रोह । अङ्गिरःऽभिः । पितृऽभिः । सम्ऽविदानः ।
आ । त्वा । मन्त्राः । कविऽशस्ताः । वहन्तु । एना । राजन् । हविषः । मादयस्व ॥ ६० ॥
इतः । एते । उत्ऽआरुहन् । दिवः । पृष्ठानि । आ । अरुहन् ।
प्र । भूःऽजयः । यथा । पथा । द्याम् । अङ्गिरसः । ययुः ॥ ६१ ॥

(२) द्वितीयं सूक्तम्

(१-६०) षष्ट्यृचस्यास्य सूक्तस्याथर्वा ऋषिः । (१-३, ६-२८, ३०-३३, ३५-६०) प्रथमादितृचस्य षष्ठयादिमयो-विंशत्यृचां त्रिंशत्यादितृचस्य पञ्चत्रिंशत्यादिषड्विंशतेश्च यमो मन्त्रोक्ताश्च, (४, ३४) चतुर्थीचतुस्त्रिंश्योरग्निः, (५) पञ्चम्या जातवेदाः, (२९) एकोनत्रिंश्याश्च पितरो देवताः । (१-३, ६, १४-१८, २०, २२-२३, २५, ३०, ३४, ३६, ४६, ४८, ५०-५२, ५६) प्रथमादितृचस्य षष्ठ्याश्चतुर्दश्यादिपञ्चानां विंशीद्वाविंशीत्रयोविंशीपञ्चविंशीत्रिंशीचतुस्त्रिंशीषट्त्रिंशीषट्चत्वारिंशषट्चत्वारिंशीनां पञ्चाशदादितृचस्य षट्पञ्चाशत्याश्चानुष्टुप्, (४, ७, ९, १३) चतुर्थीसप्तमीनवमीत्रयोदशीनां जगती, (५, २६, ४९, ५७) पञ्चमीषड्विंश्येकोनपञ्चाशीसप्तपञ्चाशीनां भुरिक्त्रिष्टुप्, (८, १०-१२, २१, २७-२९, ३१-३३, ३५, ४७, ५३-५५, ५८-६०) अष्टम्या दशम्यादितृचस्यैकविंश्याः सप्तविंश्यादितृचस्यैकत्रिंश्यादितृचस्य पञ्चत्रिंशीसप्तचत्वारिंश्योस्त्रिपञ्चाशदादितृचस्याष्टपञ्चाशत्यादितृचस्य च त्रिष्टुप्, (१९) एकोनविंश्यास्त्रिपदार्षी गायत्री, (२४) चतुर्विंश्यास्त्रिपदा समविषमार्षी गायत्री, (३७) सप्तत्रिंश्या विराड्जगती, (३८-३९, ४१) अष्टात्रिंश्येकोनचत्वारिंश्येक-चत्वारिंशीनामार्षी गायत्री, (४०, ४२-४४) चत्वारिंश्या द्विचत्वारिंश्यादितृचस्य च भुरिगार्षी गायत्री, (४५) पञ्चचत्वारिंश्याश्च ककुम्मत्यनुष्टुप् छन्दांसि ॥

यमाय सोमः पवते यमाय क्रियते हविः ।
यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः ॥१॥

यमाय । सोमः । पवते । यमाय । क्रियते । हविः ।
यमम् । ह । यज्ञः । गच्छति । अग्निऽदूतः । अरम्ऽकृतः ॥ १ ॥

XVIII.1.59 Come thou hither with the worshipful Añgirases; revel here, O Yama, with the Vāirūpas — I call Vivasvant, who is thy father sitting down upon this barhis. [Rg X.14.5]

XVIII.1.60 Ascend thou, O Yama, this cushion, in concord with the Añgiras Fathers; let the sacred utterances made in praise by the poets bring thee; then, O king, revel thou in the oblation. [Rg.X.14.4]

XVIII.1.61 These ascended up from here; they ascended the backs of the sky; the Añgirases have gone forth to heaven, like bhūrjis, by the road.

Yama

XVIII.2.1 For Yama the soma purifies itself; for Yama is made the oblation; to Yama goes the sacrifice, messengered by Agni, made satisfactory.

यमाय मधुमत्तमं जुहोता प्र च तिष्ठत ।
इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः ॥२॥
यमाय घृतवत्पयो राज्ञे हविर्जुहोतन ।
स नो जीवेष्वा यमेद्दीर्घमायुः प्र जीवसे ॥३॥
मैनमग्ने वि दहो माभि शूशुचो मास्य त्वचं चिक्षिपो मा शरीरम् ।
शृतं यदा करसि जातवेदोऽथेमेनं प्र हिणुतात्पितॄँरुप ॥४॥
यदा शृतं कृणवो जातवेदोऽथेममेनं परि दत्तात्पितृभ्यः ।
यदो गच्छात्यसुनीतिमेतामथ देवानां वशनीर्भवाति ॥५॥
त्रिकद्रुकेभिः पवते षडुर्वीरेकमिद्बृहत् ।
त्रिष्टुब्गायत्री छन्दांसि सर्वा ता यम आर्पिता ॥६॥
सूर्यं चक्षुषा गच्छ वातमात्मना दिवं च गच्छ पृथिवीं च धर्मभिः ।
अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रति तिष्ठा शरीरैः ॥७॥

यमाय । मधुमत्ऽतमम् । जुहोत । प्र । च । तिष्ठत ।
इदम् । नमः । ऋषिऽभ्यः । पूर्वऽजेभ्यः । पूर्वेभ्यः । पथिकृत्ऽभ्यः ॥ २ ॥
यमाय । घृतऽवत् । पयः । राज्ञे । हविः । जुहोतन ।
सः । नः । जीवेषु । आ । यमेत् । दीर्घम् । आयुः । प्र । जीवसे ॥ ३ ॥
मा । एनम् । अग्ने । वि । दहः । मा । अभि । शूशुचः । मा । अस्य । त्वचम् ।
चिक्षिपः । मा । शरीरम् । शृतम् । यदा । करसि । जातऽवेदः । अथ । ईम् । एनम् ।
प्र । हिनुतात् । पितॄन् । उप ॥ ४ ॥
यदा । शृतम् । कृणवः । जातऽवेदः । अथ । इमम् । एनम् । परि । दत्तात् । पितृऽभ्यः ।
यदो इति । गच्छाति । असुऽनीतिम् । एताम् । अथ । देवानाम् । वशऽनीः । भवाति ॥
त्रिऽकद्रुकेभिः । पवते । षट् । उर्वीः । एकम् । इत् । बृहत् ।
त्रिऽस्तुप् । गायत्री । छन्दांसि । सर्वा । ता । यमे । आर्पिता ॥ ६ ॥
सूर्यम् । चक्षुषा । गच्छ । वातम् । आत्मना । दिवम् । च । गच्छ । पृथिवीम् । च ।
धर्मऽभिः । अपः । वा । गच्छ । यदि । तत्र । ते । हितम् । ओषधीषु । प्रति । तिष्ठ । शरीरैः ॥७॥

XVIII.2.2 Offer ye to Yama what is most honeyed, and stand forth; this homage to the former-born the former, the path-making seers.

XVIII.2.3 Unto Yama the king offer ye an oblation, milk rich in ghee; he furnished to us among the living a long life-time, for living on.

Agniḥ

XVIII.2.4 Do not, O Agni, burn him up; do not be hot upon him; do not warp his skin, nor his body; when thou shalt make him done, O Jātavedas, then send him forward unto the Fathers.

Jātaveda

XVIII.2.5 When thou shalt make him done, O Jātavedas, then commit him to the Fathers; when he shall go to that other life, then shall he become a controller of the gods.

Yama

XVIII.2.6 With the trikadrukas it purifies itself; six wide ones, verily one great one; triṣṭubh, gāyatrī, the meters: all those (are) set in Yama.

XVIII.2.7 Go thou to the sun with thine eye, to the wind with thy soul; go both to heaven and to earth with (their) due shares; or go to the waters, if there it is acceptable to thee; in the herbs stand firm with thy bodies.

अजो भागस्तपसस्तं तपस्व तं ते शोचिस्तपतु तं ते अर्चिः ।
यास्ते शिवास्तन्वो जातवेदस्ताभिर्वहैनं सुकृतामु लोकम् ॥८॥
यास्ते शोचयो रंहयो जातवेदो याभिरापृणासि दिवमन्तरिक्षम् ।
अजं यन्तमनु ताः समृण्वतामथेतराभिः शिवतमाभिः शृतं कृधि ॥९॥
अव सृज पुनरग्ने पितृभ्यो यस्त आहुतश्चरति स्वधावान् ।
आयुर्वसान उप यातु शेषः सं गच्छतां तन्वा सुवर्चाः ॥१०॥ (७)
अति द्रव श्वानौ सारमेयौ चतुरक्षौ शबलौ साधुना पथा ।
अधा पितॄन्त्सुविदत्राँ अपीहि यमेन ये सधमादं मदन्ति ॥११॥
यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिषदी नृचक्षसा ।
ताभ्यां राजन्परि धेह्येनं स्वस्त्यस्मा अनमीवं च धेहि ॥१२॥
उरूणसावसुतृपावुदुम्बलौ यमस्य दूतौ चरतो जनाँ अनु ।
तावस्मभ्यं दृशये सूर्याय पुनर्दातामसुमद्येह भद्रम् ॥१३॥

अजः । भागः । तपसः । तम् । तपस्व । तम् । ते । शोचिः । तपतु । तम् । ते । अर्चिः ।
याः । ते । शिवाः । तन्वः । जातऽवेदः । ताभिः । वह । एनम् । सुऽकृताम् । ऊं इति । लोकम् ॥
याः । ते । शोचयः । रंहयः । जातऽवेदः । याभिः । आऽपृणासि । दिवम् । अन्तरिक्षम् ।
अजम् । यन्तम् । अनु । ताः । सम् । ऋण्वताम् । अथ । इतराभिः । शिवऽतमाभिः । शृतम् । कृधि ॥
अव । सृज । पुनः । अग्ने । पितृऽभ्यः । यः । ते । आऽहुतः । चरति । स्वधाऽवान् ।
आयुः । वसानः । उप । यातु । शेषः । सम् । गच्छताम् । तन्वा । सुऽवर्चाः ॥ १० ॥
अति । द्रव । श्वानौ । सारमेयौ । चतुःऽअक्षौ । शबलौ । साधुना । पथा ।
अध । पितॄन् । सुऽविदत्रान् । अपि । इहि । यमेन । ये । सधऽमादम् । मदन्ति ॥ ११ ॥
यौ । ते । श्वानौ । यम । रक्षितारौ । चतुःऽअक्षौ । पथिसदी इति पथिऽसदी । नृऽचक्षसा ।
ताभ्याम् । राजन् । परि । धेहि । एनम् । स्वस्ति । अस्मै । अनमीवम् । च । धेहि ॥ १२ ॥
उरुऽनसौ । असुऽतृपौ । उदुम्बलौ । यमस्य । दूतौ । चरतः । जनान् । अनु ।
तौ । अस्मभ्यम् । दृशये । सूर्याय । पुनः । दाताम् । असुम् । अद्य । इह । भद्रम् ॥ १३ ॥

XVIII.2.8 The goat is the share of the heat; heat thou that; that let thine ardor heat, that thy flame what propitious bodies are thine. O Jātavedas, with them carry him to the world of the well-doing.

XVIII.2.9 What ardors, swiftnesses are thine, O Jātavedas, with which thou fillest the sky, the atmosphere, let them collect after the goat as he goes; then with other most propitious ones make him propitious.

XVIII.2.10 Release again, O Agni, to the Fathers him who goes offered to thee, with svadha; clothing himself in life, let him go unto (his) posterity; let him be united with a body, very splendid.

XVIII.2.11 Run thou past the two four-eyed, brindled dogs of Saramā, by a happy road; then go unto the beneficent Fathers, who revel in common revelry with Yama. [Also Rg X.14.10]

XVIII.2.12 What two defending dogs thou hast, O Yama, four-eyed, sitting by the road, men watching with them, O king, do thou surround him; assign to him well-being and freedom from disease. [Also Rg.X.14.11]

XVIII.2.13 Broad-nosed, feeding on lives, copper-colored, Yama's two messengers go about after men; let them give us back here today excellent life, to see the sun. [Also Rg.X.14.12]

सोम एकेभ्यः पवते घृतमेक उपासते ।
येभ्यो मधु प्रधावति तांश्चिदेवापि गच्छतात् ॥१४॥
ये चित्पूर्व ऋतसाता ऋतजाता ऋतावृधः ।
ऋषीन्तपस्वतो यम तपोजाँ अपि गच्छतात् ॥१५॥
तपसा ये अनाधृष्यास्तपसा ये स्वर्ययुः ।
तपो ये चक्रिरे महस्तांश्चिदेवापि गच्छतात् ॥१६॥
ये युध्यन्ते प्रधनेषु शूरासो ये तनूत्यजः ।
ये वा सहस्रदक्षिणास्तांश्चिदेवापि गच्छतात् ॥१७॥
सहस्रणीथाः कवयो ये गोपायन्ति सूर्यम् ।
ऋषीन्तपस्वतो यम तपोजाँ अपि गच्छतात् ॥१८॥
स्योनास्मै भव पृथिव्यनृक्षरा निवेशनी ।
यच्छास्मै शर्म सप्रथाः ॥१९॥

सोमः । एकेभ्यः । पवते । घृतम् । एके । उप । आसते ।
येभ्यः । मधु । प्रऽधावति । तान् । चित् । एव । अपि । गच्छतात् ॥ १४ ॥
ये । चित् । पूर्वे । ऋतऽसाताः । ऋतऽजाताः । ऋतऽवृधः ।
ऋषीन् । तपस्वतः । यम । तपःऽजान् । अपि । गच्छतात् ॥ १५ ॥
तपसा । ये । अनाधृष्याः । तपसा । ये । स्वः । ययुः ।
तपः । ये । चक्रिरे । महः । तान् । चित् । एव । अपि । गच्छतात् ॥ १६ ॥
ये । युध्यन्ते । प्रऽधनेषु । शूरासः । ये । तनूऽत्यजः ।
ये । वा । सहस्रऽदक्षिणाः । तान् । चित् । एव । अपि । गच्छतात ॥ १७ ॥
सहस्रऽनीथाः । कवयः । ये । गोपायन्ति । सूर्यम् ।
ऋषीन् । तपस्वतः । यम । तपःऽजान् । अपि । गच्छतात् ॥ १८ ॥
स्योना । अस्मै । भव । पृथिवि । अनृक्षरा । निऽवेशनी ।
यच्छ । अस्मै । शर्म । सऽप्रथाः ॥ १९ ॥

XVIII.2.14 Soma purifies itself for some; some wait upon ghee; for whom honey runs forward, unto them do thou go.

XVIII.2.15 They who of old were won by right, born of right, increasers of right -- to the seers rich in fervor, born of fervor, O Yama, do thou go. [Also Rg.X.154.4]

XVIII.2.16 They who by fervor are unassailable, who by fervor have gone to heaven who made fervor their greatness, unto them do thou go. [Also Rg.X.154.3]

XVIII.2.17 They who fight in the contests, who are self-sacrificing heroes, or who give thousand-fold sacrificial gifts, unto them do thou go. [Also Rg.X.154.3]

XVIII.2.18 Poets of a thousand lays, who guard the sun — to the seers rich in fervor, born of fervor, O Yama, do thou go. [Rg.x.154.5]

XVIII.2.19 Be pleasant to him, O earth, a thornless resting-place; furnish him broad refuge.

असंबाधे पृथिव्या उरौ लोके नि धीयस्व ।
स्वधा याश्चकृषे जीवन्तास्ते सन्तु मधुश्चुतः ॥२०॥ (४)

ह्वयामि ते मनसा मन इहेमान्गृहाँ उप जुजुषाण एहि ।
सं गच्छस्व पितृभिः सं यमेन स्योनास्त्वा वाता उप वान्तु शग्माः ॥२१॥

उत्त्वा वहन्तु मरुत उदवाहा उदप्रुतः ।
अजेन कृण्वन्तः शीतं वर्षेणोक्षन्तु बालिति ॥२२॥

उदह्वमायुरायुषे क्रत्वे दक्षाय जीवसे । स्वान्गच्छतु ते मनो अधा पितृँरुप द्रव ॥२३॥

मा ते मनो मासोर्माङ्गानां मा रसस्य ते । मा ते हास्त तन्वः किं चनेह ॥२४॥

मा त्वा वृक्षः सं बाधिष्ट मा देवी पृथिवी मही । लोकं पितृषु वित्त्वैधस्व यमराजसु ॥२५॥

असम्ऽबाधे । पृथिव्याः । उरौ । लोके । नि । धीयस्व ।
स्वधाः । याः । चकृषे । जीवन् । ताः । ते । सन्तु । मधुऽश्चुतः ॥ २० ॥

ह्वयामि । ते । मनसा । मनः । इह । इमान् । गृहान् । उप । जुजुषाणः । आ । इहि ।
सम् । गच्छस्व । पितृऽभिः । सम् । यमेन । स्योनाः । त्वा । वाताः । उप । वान्तु । शग्माः ॥

उत् । त्वा । वहन्तु । मरुतः । उदऽवाहाः । उदऽप्रुतः ।
अजेन । कृण्वन्तः । शीतम् । वर्षेण । उक्षन्तु । बाल् । इति ॥ २२ ॥

उत् । अह्वम् । आयुः । आयुषे । क्रत्वे । दक्षाय । जीवसे ।
स्वान् । गच्छतु । ते । मनः । अध । पितॄन् । उप । द्रव ॥ २३ ॥

मा । ते । मनः । मा । असोः । मा । अङ्गानाम् । मा । रसस्य । ते ।
मा । ते । हास्त । तन्वः । किम् । चन । इह ॥ २४ ॥

मा । त्वा । वृक्षः । सम् । बाधिष्ट । मा । देवी । पृथिवी । मही ।
लोकम् । पितृषु । वित्त्वा । एधस्व । यमराजऽसु ॥ २५ ॥

XVIII.2.20 In the unoppressive wide space of earth be thou deposited; what svadhās thou didst make when living, be they dripping with honey for thee.

XVIII.2.21 I call thy mind hither with mind; come unto these houses, enjoying (them); unite thyself with the Fathers, with Yama; let pleasant, helpful winds blow thee unto (them).

XVIII.2.22 Let the water-carrying, water-floating Maruts carry thee up, making (thee) with rain, splash.

XVIII.2.23 I have called up life-time unto life-time, unto ability, unto dexterity, unto life; let thy mind go to its own; then run unto the Fathers.

XVIII.2.24 Let nothing whatever of thy mind, nor of thy life, nor of thy members, nor of thy sap, nor of thy body, be left here.

XVIII.2.25 Let not the tree oppress thee, nor the great divine earth; having found a place among the Fathers, thrive thou among those whose king is Yama.

यत्ते अङ्गमतिहितं पराचैरपानः प्राणो य उ वा ते परेतः ।
तत्ते संगत्य पितरः सनीडा घासाद्घासं पुनरा वेशयन्तु ॥२६॥
अपेमं जीवा अरुधन्गृहेभ्यस्तं निर्वहत परि ग्रामादितः ।
मृत्युर्यमस्यासीद्दूतः प्रचेता असून्पितृभ्यो गमयां चकार ॥२७॥
ये दस्यवः पितृषु प्रविष्टा ज्ञातिमुखा अहुतादश्चरन्ति ।
परापुरो निपुरो ये भरन्त्यग्निष्टानस्मात्प्र धमाति यज्ञात् ॥२८॥
सं विशन्त्विह पितरः स्वा नः स्योनं कृण्वन्तः प्रतिरन्त आयुः ।
तेभ्यः शकेम हविषा नक्षमाणा ज्योग्जीवन्तः शरदः पुरूचीः ॥२९॥
यां ते धेनुं निपृणामि यमु ते क्षीर ओदनम् ।
तेना जनस्यासो भर्ता योऽत्रासदजीवनः ॥३०॥ (५)
अश्वावतीं प्र तर या सुशेवार्क्षाकं वा प्रतरं नवीयः ।
यस्त्वा जघान वध्यः सो अस्तु मा सो अन्यद्विदत भागधेयम् ॥३१॥

यत् । ते । अङ्गम् । अतिऽहितम् । पराचैः । अपानः । प्राणः । यः । ऊं इति । वा । ते ।
पराऽइतः । तत् । ते । सम्ऽगत्य । पितरः । सऽनीडाः । घासात् । घासम् । पुनः । आ । वेशयन्तु ॥
अप । इमम् । जीवाः । अरुधन् । गृहेभ्यः । तम् । निः । वहत । परि । ग्रामात् । इतः ।
मृत्युः । यमस्य । आसीत् । दूतः । प्रऽचेताः । असून् । पितृऽभ्यः । गमयाम् । चकार ॥ २७ ॥
ये । दस्यवः । पितृषु । प्रऽविष्टाः । ज्ञातिऽमुखाः । अहुतऽअदः । चरन्ति ।
पराऽपुरः । निऽपुरः । ये । भरन्ति । अग्निः । तान् । अस्मात् । प्र । धमाति । यज्ञात् ॥२८॥
सम् । विशन्तु । इह । पितरः । स्वाः । नः । स्योनम् । कृण्वन्तः । प्रऽतिरन्तः । आयुः ।
तेभ्यः । शकेम । हविषा । नक्षमाणाः । ज्योक् । जीवन्तः । शरदः । पुरूचीः ॥ २९ ॥
याम् । ते । धेनुम् । निऽपृणामि । यम् । ऊं इति । ते । क्षीरे । ओदनम् ।
तेन । जनस्य । असः । भर्ता । यः । अत्र । असत् । अजीवनः ॥ ३० ॥
अश्वऽवतीम् । प्र । तर । या । सुऽशेवा । ऋक्षाकम् । वा । प्रऽतरम् । नवीयः ।
यः । त्वा । जघान । वध्यः । सः । अस्तु । मा । सः । अन्यत् । विदत । भागऽधेयम् ॥३१॥

XVIII.2.26 What limb of thine is put over at a distance, and what expiration (or) breath has gone forth upon the wind; let the associated Fathers, assembling, make that enter thee again, bit from bit.

XVIII.2.27 The living have excluded this man from their houses; carry ye him out, forth from this village; death was the kindly messenger of Yama; he made his life-breaths go to the Fathers.

XVIII.2.28 What barbarians, having entered among the Fathers, having faces of acquaintances, go about, eating what is not sacrificed, who bear parāpur (and) nipur — Agni shall blast them forth from this sacrifice.

Pitraḥ

XVIII.2.29 Let there enter together here our own Fathers, doing what is pleasant, lengthening (our) life-time; may we be able to reach them with oblation, living long for numerous autumns.

Yama

XVIII.2.30 What milch-cow I set down for thee, and what rice-dish for thee in milk — with that mayest thou be the supporter of the person who is there without a living.

XVIII.2.31 Pass forward (over a stream) rich in horses, which is very propitious, or, further on, and rksāka, more new; he who slew thee, be he one to be killed; let him not find any other portion.

यमः परोवरो विवस्वान्ततः परं नातिं पश्यामि किं चन ।
यमे अध्वरो अधि मे निविष्टो भुवो विवस्वाननुन्वाततान ॥३२॥
अपागूहन्नमृतां मर्त्येभ्यः कृत्वा सवर्णामदधुर्विवस्वते ।
उताश्विनावभरद्यत्तदासीदजहादु द्वा मिथुना सरण्यूः ॥३३॥
ये निखाता ये परोप्ता ये दग्धा ये चोद्धिताः ।
सर्वांस्तानग्न आ वह पितॄन्हविषे अत्तवे ॥३४॥
ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया मादयन्ते ।
त्वं तान्वेत्थ यदि ते जातवेदः स्वधया यज्ञं स्वधितिं जुषन्ताम् ॥३५॥
शं तप माति तपो अग्ने मा तन्वं तपः ।
वनेषु शुष्मो अस्तु ते पृथिव्यामस्तु यद्धरः ॥३६॥
ददाम्यस्मा अवसानमेतद्य एष आगन्मम चेदभूदिह ।
यमश्चिकित्वान्प्रत्येतदाह ममैष राय उप तिष्ठतामिह ॥३७॥

यमः । परः । अवरः । विवस्वान् । ततः । परम् । न । अति । पश्यामि । किम् । चन ।
यमे । अध्वरः । अधि । मे । निऽविष्टः । भुवः । विवस्वान् । अनुऽआततान ॥ ३२ ॥
अप । अगूहन् । अमृताम् । मर्त्येभ्यः । कृत्वा । सऽवर्णाम् । अदधुः । विवस्वते ।
उत । अश्विनौ । अभरत् । यत् । तत् । आसीत् । अजहात् । ऊं इति । द्वा । मिथुना । सरण्यूः ॥
ये । निऽखाताः । ये । पराऽउप्ताः । ये । दग्धाः । ये । च । उत्ऽहिताः ।
सर्वान् । तान् । अग्ने । आ । वह । पितॄन् । हविषे । अत्तवे ॥ ३४ ॥
ये । अग्निऽदग्धाः । ये । अनग्निऽदग्धाः । मध्ये । दिवः । स्वधया । मादयन्ते ।
त्वम् । तान् । वेत्थ । यदि । ते । जातऽवेदः । स्वधया । यज्ञम् । स्वऽधितिम् । जुषन्ताम् ॥३५॥
शम् । तप । मा । अति । तपः । अग्ने । मा । तन्वम् । तपः ।
वनेषु । शुष्मः । अस्तु । ते । पृथिव्याम् । अस्तु । यत् । हरः ॥ ३६ ॥
ददामि । अस्मै । अवऽसानम् । एतत् । यः । एषः । आऽअगन् । मम । च । इत् ।
अभूत् । इह । यमः । चिकित्वान् । प्रति । एतत् । आह । मम । एषः । राये ।
उप । तिष्ठताम् । इह ॥ ३७ ॥

XVIII.2.32 Yama beyond, below Vivasvant — beyond that do I see nothing whatever; into Yama has entered my sacrifice; Vivasvant stretched after the worlds.

XVIII.2.33 They hid away the immortal one from mortals; having made one of like color, they gave her to Vivasvant; what that was carried also the two Aśvins; and Saraṇyū deserted two twins.

Agnih

XVIII.2.34 They that are buried, and they that are scattered away, they that are burned and they that are set up — all those Fathers, O Agni, bring thou to eat the oblation.

Yama

XVIII.2.35 They who, burned with fire, (and) who, not burned with fire, revel on svadhā in the midst of heaven — them thou knowest, if thine, O Jātavedas; let them enjoy with svadhā the sacrifice, the svadh iti..

XVIII.2.36 Burn thou propitiously; do not burn evermuch; O Agni, do not burn the body; be thy vehemence in the woods; on the earth be what is thy violence.

XVIII.2.37 I give this release to him who hath thus come and hath become mine here — thus replies the knowing Yama — let this one approach my wealth here.

इमां मात्रां मिमीमहे यथापरं न मासातै । शते शरत्सु नो पुरा ॥३८॥
प्रेमां मात्रां मिमीमहे यथापरं न मासातै । शते शरत्सु नो पुरा ॥३९॥
अपेमां मात्रां मिमीमहे यथापरं न मासातै । शते शरत्सु नो पुरा ॥४०॥ (१०)
वी३मां मात्रां मिमीमहे यथापरं न मासातै । शते शरत्सु नो पुरा ॥४१॥
निरिमां मात्रां मिमीमहे यथापरं न मासातै । शते शरत्सु नो पुरा ॥४२॥
उदिमां मात्रां मिमीमहे यथापरं न मासातै । शते शरत्सु नो पुरा ॥४३॥
समिमां मात्रां मिमीमहे यथापरं न मासातै । शते शरत्सु नो पुरा ॥४४॥

इमाम् । मात्राम् । मिमीमहे । यथा । अपरम् । न । मासातै । शते । शरत्ऽसु । नो इति । पुरा ॥ ३८ ॥

प्र । इमाम् । मात्राम् । मिमीमहे । यथा । अपरम् । न । मासातै । शते । शरत्ऽसु । नो इति । पुरा ॥ ३९ ॥

अप । इमाम् । मात्राम् । मिमीमहे । यथा । अपरम् । न । मासातै । शते । शरत्ऽसु । नो इति । पुरा ॥ ४० ॥

वि । इमाम् । मात्राम् । मिमीमहे । यथा । अपरम् । न । मासातै । शते । शरत्ऽसु । नो इति । पुरा ॥ ४१ ॥

निः । इमाम् । मात्राम् । मिमीमहे । यथा । अपरम् । न । मासातै । शते । शरत्ऽसु । नो इति । पुरा ॥ ४२ ॥

उत् । इमाम् । मात्राम् । मिमीमहे । यथा । अपरम् । न । मासातै । शते । शरत्ऽसु । नो इति । पुरा ॥ ४३ ॥

सम् । इमाम् । मात्राम् । मिमीमहे । यथा । अपरम् । न । मासातै । शते । शरत्ऽसु । नो इति । पुरा ॥ ४४ ॥

XVIII.2.38 This measure do we measure, so that one may not measure further; in a hundred autumns, not before.

XVIII.2.39 This measures do we measure forth, so that etc.etc.

XVIII.2.40 This measures do we measure off, so that etc.etc.

XVIII.2.41 This measures do we measure apart, so that etc.etc.

XVIII.2.42 This measures do we measure out, so that etc.etc.

XVIII.2.43 This measures do we measure up, so that etc.etc.

XVIII.2.44 This measures do we measure together, so that etc.etc.

अमासि मात्रां स्वरगामायुष्मान्भूयासम् । यथापरं न मासातै शते शरत्सु नो पुरा ॥४५॥
प्राणो अपानो व्यान आयुश्चक्षुर्दृशये सूर्याय । अपरिपरेण पथा यमराज्ञः पितॄन्गच्छ ॥४६॥

ये अग्रवः शशमानाः परेयुर्हित्वा द्वेषांस्यनपत्यवन्तः ।
ते द्यामुदित्याविदन्त लोकं नाकस्य पृष्ठे अधि दीध्यानाः ॥४७॥

उदन्वती द्यौरवमा पीलुमतीति मध्यमा ।
तृतीया ह प्रद्यौरिति यस्यां पितर आसते ॥४८॥

ये नः पितुः पितरो ये पितामहा य आविविशुरुर्वन्तरिक्षम् ।
य आक्षियन्ति पृथिवीमुत द्यां तेभ्यः पितृभ्यो नमसा विधेम ॥४९॥

इदमिद्वा उ नापरं दिवि पश्यसि सूर्यम् । माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि ॥५०॥
इदमिद्वा उ नापरं जरस्यन्यदितोपरम् । जाया पतिमिव वाससाभ्येनं भूम ऊर्णुहि ॥५१॥

अमासि । मात्राम् । स्वः । अगाम् । आयुष्मान् । भूयासम् ।
यथा । अपरम् । न । मासातै । शते । शरत्ऽसु । नो इति । पुरा ॥ ४५ ॥
प्राणः । अपानः । विऽआनः । आयुः । चक्षुः । दृशये । सूर्याय ।
अपरिऽपरेण । पथा । यमऽराज्ञः । पितॄन् । गच्छ ॥ ४६ ॥

ये । अग्रवः । शशमानाः । पराऽईयुः । हित्वा । द्वेषांसि । अनपत्यऽवन्तः ।
ते । द्याम् । उत्ऽइत्य । अविदन्त । लोकम् । नाकस्य । पृष्ठे । अधि । दीध्यानाः ॥ ४७ ॥

उदन्ऽवती । द्यौः । अवमा । पीलुऽमती । इति । मध्यमा ।
तृतीया । ह । प्रऽद्यौः । इति । यस्याम् । पितरः । आसते ॥ ४८ ॥

ये । नः । पितुः । पितरः । ये । पितामहाः । ये । आऽविविशुः । उरु । अन्तरिक्षम् ।
ये । आऽक्षियन्ति । पृथिवीम् । उत । द्याम् । तेभ्यः । पितृभ्यः । नमसा । विधेम ॥४९॥

इदम् । इत् । वै । ऊं इति । न । अपरम् । दिवि । पश्यसि । सूर्यम् ।
माता । पुत्रम् । यथा । सिचा । अभि । एनम् । भूमे । ऊर्णुहि ॥ ५० ॥
इदम् । इत् । वै । ऊं इति । न । अपरम् । जरसि । अन्यत् । इतः । अपरम् ।
जाया । पतिम्ऽइव । वाससा । अभि । एनम् । भूमे । ऊर्णुहि ॥ ५१ ॥

XVIII.2.45 I have measured the measure, I have gone to heaven; may I be long-lived; so that etc.etc.

XVIII.2.46 Breath, expiration, through-breathing, life-time, an eye to see the sun: by a road not beset with enemies go thou to the Fathers whose king is Yama.

XVIII.2.47 They that departed unmarried (but) assiduous, abandoning hatreds, having no progeny — they, going up to heaven, have found a place, (they) shining upon the back of the firmament.

XVIII.2.48 Watery is the lowest heaven, full of stars is called the midmost; the third is called the fore-heaven, in which the Fathers sit.

XVIII.2.49 They that are our Father's fathers, that are (his) grandfathers, that entered the wide atmosphere, they that dwell upon earth and heaven — to those Fathers would we pay worship with homage.

XVIII.2.50 This time, verily, not further, seest thou the sun in the heaven; as a mother her son with her hem, do thou cover him, O earth.

XVIII.2.51 This time, verily; not further; in old age another further than this; as a wife her husband with her garment, do thou cover him, O earth.

अभि त्वोर्णोमि पृथिव्या मातुर्वस्त्रेण भद्रया ।
जीवेषु भद्रं तन्मयि स्वधा पितृषु सा त्वयि ॥५२॥
अग्नीषोमा पथिकृता स्योनं देवेभ्यो रत्नं दधथुर्वि लोकम् ।
उप प्रेष्यन्तं पूषणं यो वहात्यञ्जोयानैः पथिभिस्तत्र गच्छतम् ॥५३॥
पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः ।
स त्वैतेभ्यः परि ददत्पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः ॥५४॥
आयुर्विश्वायुः परि पातु त्वा पूषा त्वा पातु प्रपथे पुरस्तात् ।
यत्रासते सुकृतो यत्र त ईयुस्तत्र त्वा देवः सविता दधातु ॥५५॥
इमौ युनज्मि ते वह्नी असुनीताय वोढवे ।
ताभ्यां यमस्य सादनं समितीश्चाव गच्छतात् ॥५६॥
एतत्त्वा वासः प्रथमं न्वागन्नपैतदूह यदिहाबिभः पुरा ।
इष्टापूर्तमनुसंक्राम विद्वान्यत्र ते दत्तं बहुधा विबन्धुषु ॥५७॥

अभि । त्वा । ऊर्णोमि । पृथिव्याः । मातुः । वस्त्रेण । भद्रया ।
जीवेषु । भद्रम् । तत् । मयि । स्वधा । पितृषु । सा । त्वयि ॥ ५२ ॥
अग्नीषोमा । पथिऽकृता । स्योनम् । देवेभ्यः । रत्नम् । दधथुः । वि । लोकम् ।
उप । प्र । ईष्यन्तम् । पूषणम् । यः । वहाति । अञ्जःऽयानैः । पथिऽभिः । तत्र । गच्छतम् ॥
पूषा । त्वा । इतः । च्यवयतु । प्र । विद्वान् । अनष्टऽपशुः । भुवनस्य । गोपाः ।
सः । त्वा । एतेभ्यः । परि । ददत् । पितृऽभ्यः । अग्निः । देवेभ्यः । सुऽविदत्रियेभ्यः ॥ ५४ ॥
आयुः । विश्वऽआयुः । परि । पातु । त्वा । पूषा । त्वा । पातु । प्रऽपथे । पुरस्तात् ।
यत्र । आसते । सुऽकृतः । यत्र । ते । ईयुः । तत्र । त्वा । देवः । सविता । दधातु ॥ ५५ ॥
इमौ । युनज्मि । ते । वह्नी इति । असुऽनीताय । वोढवे ।
ताभ्याम् । यमस्य । सदनम् । सम्ऽइतीः । च । अव । गच्छतात् ॥ ५६ ॥
एतत् । त्वा । वासः । प्रथमम् । नु । आ । अगन् । अप । एतत् । ऊह । यत् । इह ।
अबिभः । पुरा । इष्टापूर्तम् । अनुऽसंक्राम । विद्वान् । यत्र । ते । दत्तम् । बहुऽधा । विऽबन्धुषु ॥

XVIII.2.52 I cover thee excellently with the garment of mother earth; what is excellent among the living, that with me; svādha among the Fathers, that with thee.

XVIII.2.53 O Agni and Soma, makers of roads, ye have distributed to the gods a pleasant treasure (and) world; send ye unto (us) Pūṣan, who shall carry by goat-traveled roads him that goes thither.

XVIII.2.54 Let Pūsan, knowing, urge thee forth from here—he, the shepherd of creation who loses no cattle; may he commit thee to those Fathers, (and) Agni to the beneficent gods.

XVIII.2.55 May life-time, having all life-time, protect thee about; let Pūṣhan protect thee in front on the forward road; where sit the well-doers, whither they have gone, there let god Savitar set thee.

XVIII.2.56 I yoke for thee these two conveyers (vāhni), to convey thee to the other life; with them to Yama's seat and to the assemblies go thou down.

XVIII.2.57 This garment hath now come first to thee; remove that one which thou didst wear here before; knowing, do thou follow along with what is offered and bestowed, where it is given thee variously among them of various connection.

अभि त्वोर्णोमि पृथिव्या मातुर्वस्त्रेण भद्रया ।
जीवेषु भद्रं तन्मयि स्वधा पितृषु सा त्वयि ॥५२॥
अग्नीषोमा पथिकृता स्योनं देवेभ्यो रत्नं दधथुर्वि लोकम् ।
उप प्रेष्यन्तं पूषणं यो वहात्यञ्जोयानैः पथिभिस्तत्र गच्छतम् ॥५३॥
पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः ।
स त्वैतेभ्यः परि ददत्पितृभ्योग्निर्देवेभ्यः सुविदत्रियेभ्यः ॥५४॥
आयुर्विश्वायुः परि पातु त्वा पूषा त्वा पातु प्रपथे पुरस्तात् ।
यत्रासते सुकृतो यत्र त ईयुस्तत्र त्वा देवः सविता दधातु ॥५५॥
इमौ युनज्मि ते वह्नी असुनीताय वोढवे ।
ताभ्यां यमस्य सादनं समितीश्चाव गच्छतात् ॥५६॥
एतत्त्वा वासः प्रथमं न्वागन्नपैतदूह यदिहाबिभः पुरा ।
इष्टापूर्तमनुसंक्राम विद्वान्यत्र ते दत्तं बहुधा विबन्धुषु ॥५७॥

अभि । त्वा । ऊर्णोमि । पृथिव्याः । मातुः । वस्त्रेण । भद्रया ।
जीवेषु । भद्रम् । तत् । मयि । स्वधा । पितृषु । सा । त्वयि ॥ ५२ ॥

अग्नीषोमा । पथिऽकृता । स्योनम् । देवेभ्यः । रत्नम् । दधथुः । वि । लोकम् ।
उप । प्र । ईष्यन्तम् । पूषणम् । यः । वहाति । अञ्जःऽयानैः । पथिऽभिः । तत्र । गच्छतम् ॥

पूषा । त्वा । इतः । च्यवयतु । प्र । विद्वान् । अनष्टऽपशुः । भुवनस्य । गोपाः ।
सः । त्वा । एतेभ्यः । परि । ददत् । पितृऽभ्यः । अग्निः । देवेभ्यः । सुऽविदत्रियेभ्यः ॥ ५४ ॥

आयुः । विश्वऽआयुः । परि । पातु । त्वा । पूषा । त्वा । पातु । प्रऽपथे । पुरस्तात् ।
यत्र । आसते । सुऽकृतः । यत्र । ते । ईयुः । तत्र । त्वा । देवः । सविता । दधातु ॥ ५५ ॥

इमौ । युनज्मि । ते । वह्नी इति । असुऽनीताय । वोढवे ।
ताभ्याम् । यमस्य । सदनम् । सम्ऽइतीः । च । अव । गच्छतात् ॥ ५६ ॥

एतत् । त्वा । वासः । प्रथमम् । नु । आ । अगन् । अप । एतत् । ऊह । यत् । इह ।
अबिभः । पुरा । इष्टापूर्तम् । अनुऽसंक्राम । विद्वान् । यत्र । ते । दत्तम् । बहुऽधा । विऽबन्धुषु ॥

XVIII.2.52 I cover thee excellently with the garment of mother earth; what is excellent among the living, that with me; svādha among the Fathers, that with thee.

XVIII.2.53 O Agni and Soma, makers of roads, ye have distributed to the gods a pleasant treasure (and) world; send ye unto (us) Pūṣan, who shall carry by goat-traveled roads him that goes thither.

XVIII.2.54 Let Pūsan, knowing, urge thee forth from here—he, the shepherd of creation who loses no cattle; may he commit thee to those Fathers, (and) Agni to the beneficent gods.

XVIII.2.55 May life-time, having all life-time, protect thee about; let Pūṣhan protect thee in front on the forward road; where sit the well-doers, whither they have gone, there let god Savitar set thee.

XVIII.2.56 I yoke for thee these two conveyers (vāhni), to convey thee to the other life; with them to Yama's seat and to the assemblies go thou down.

XVIII.2.57 This garment hath now come first to thee; remove that one which thou didst wear here before; knowing, do thou follow along with what is offered and bestowed, where it is given thee variously among them of various connection.

अ॒ग्नेर्वर्म॒ परि॒ गोभि॑र्व्ययस्व॒ सं प्रोर्णु॑ष्व॒ मेद॑सा॒ पीव॑सा च ।
नेत्त्वा॑ धृ॒ष्णुर्हर॑सा॒ जर्हृ॑षाणो॒ दधृ॒ग्विध॒क्षन्प॑री॒ङ्खया॑ते ॥५८॥
द॒ण्डं हस्ता॑दा॒ददा॑नो ग॒तासोः॒ स॒ह श्रोत्रे॑ण॒ वर्च॑सा॒ बले॑न ।
अत्रै॒व त्वमि॒ह व॒यं सु॒वीरा॒ विश्वा॒ मृधो॑ अ॒भिमा॑तीर्जयेम ॥५९॥
धनु॒र्हस्ता॑दा॒ददा॑नो मृ॒तस्य॑ स॒ह क्ष॒त्रेण॒ वर्च॑सा॒ बले॑न ।
स॒मागृ॑भाय॒ वसु॑ भूरि॒ पु॒ष्टम॒र्वाङ् त्वमेह्युप॑ जीवल॒ोकम् ॥६०॥ (१७)

अ॒ग्नेः । वर्म॑ । परि॑ । गोभिः॑ । व्य॒य॒स्व॒ । सम् । प्र । ऊ॒र्णु॒ष्व॒ । मेद॑सा । पीव॑सा । च॒ ।
न । इत् । त्वा॒ । धृ॒ष्णुः । हर॑सा । जर्हृ॑षाणः । द॒धृक् । वि॒ऽध॒क्षन् । प॒रि॒ऽई॒ङ्खया॑ते ॥५८॥
द॒ण्डम् । हस्ता॑त् । आ॒ऽददा॑नः । ग॒तऽअ॑सोः । स॒ह । श्रोत्रे॑ण । वर्च॑सा । बले॑न ।
अत्र॑ । ए॒व । त्वम् । इ॒ह । व॒यम् । सु॒ऽवीराः॑ । विश्वाः॑ । मृधः॑ । अ॒भिऽमा॑तीः । ज॒येम॒ ॥ ५९ ॥
धनुः॑ । हस्ता॑त् । आ॒ऽददा॑नः । मृ॒तस्य॑ । स॒ह । क्ष॒त्रेण॑ । वर्च॑सा । बले॑न ।
स॒म्ऽआगृ॑भाय । वसु॑ । भूरि॑ । पु॒ष्टम् । अ॒र्वाङ् । त्वम् । आ । इ॒हि॒ । उप॑ । जी॒व॒ऽल॒ोकम् ॥ ६० ॥

(३) तृतीयं सूक्तम्

(१-७३) त्रिसप्तत्यृचस्यास्य सूक्तस्याथर्वा ऋषिः । (१-४, ७-४२, ४५, ४७-४९, ५१-५३, ५५, ५७-७३) प्रथमादिचतुर्ऋचां सप्तम्यादिषट्त्रिंशतः पञ्चचत्वारिंश्याः सप्तचत्वारिंश्यादितृचस्यैकपञ्चाशत्यादितृचस्य पञ्चपञ्चाश्याः सप्तपञ्चाश्यादिसप्तदशानाञ्च यमो मन्त्रोक्ताश्च, (५-६) पञ्चमीषष्ठ्योरग्निः, (४४, ४६) चतुश्चत्वारिंशीषट्चत्वारिंश्योर्मन्त्रोक्ताः, (५०) पञ्चाशत्या भूमिः, (५४) चतुष्पञ्चाश्या इन्दुः, (५६) षट्पञ्चाश्याश्च आपो देवताः । (१-३, ७, ९-१०, १२-१७, १९-२२, २४, ३८, ४०-४३, ४५, ४८, ५१, ५३, ५५, ५७, ५९, ६१-६३, ६५-६६, ७३) प्रथमादितृचस्य सप्तमीनवमीदशमीनां द्वादश्यादिषण्णामेकोनविंश्यादिचतसृणां चतुर्विंश्यष्टात्रिंश्योश्चत्वारिंश्यादिचतसृणां पञ्चचत्वारिंश्यष्टचत्वारिंश्येकपञ्चाशीत्रिपञ्चाशीपञ्चपञ्चाशीसप्तपञ्चाश्येकोनषष्टीनामेकषष्ट्यादितृचस्य पञ्चषष्टीषट्षष्टीत्रिसप्ततितमानाञ्च त्रिष्टुप्, (४, ८, ११, २३) चतुर्थ्यष्टम्येकादशीत्रयोविंशीनां सतःपङ्क्तिः, (५) पञ्चम्यास्त्रिपदा निचृद्गायत्री, (६, ५६, ६८, ७०, ७२) षष्ठीषट्पञ्चाश्यष्टषष्टीसप्ततितमाद्विसप्ततितमानाञ्चानुष्टुप्, (२५, २७, ४४, ४६) पञ्चविंशीसप्तविंशीचतुश्चत्वारिंशीषट्चत्वारिंशीनां जगती, (२६, २८) षड्विंश्यष्टाविंश्योर्भुरिग्जगती, (२९) एकोनत्रिंश्या विराड्जगती, (३०) त्रिंश्याः पञ्चपदातिजगती, (३१) एकत्रिंश्या विराट् शक्वरी, (३२-३५, ४७, ४९, ५२) द्वात्रिंश्यादिचतसृणां सप्तचत्वारिंश्येकोनपञ्चाशीद्विपञ्चाशीनां [(१८) अष्टादश्याश्च] भुरिक्त्रिष्टुप्, (३६) षट्त्रिंश्या एकावसानासुर्यनुष्टुप्, (३७) सप्तत्रिंश्या एकावसानासुरी गायत्री, (३९) एकोनचत्वारिंश्याः परात्रिष्टुप् पङ्क्तिः, (५०) पञ्चाशत्याः प्रस्तारपङ्क्तिः, (५४) चतुष्पञ्चाश्याः पुरोऽनुष्टुप्त्रिष्टुप्, (५८) अष्टपञ्चाश्या विराट्त्रिष्टुप्, (६०) षष्ठ्यास्त्र्यवसाना षट्पदा जगती, (६४) चतुःषष्ट्या भुरिक्पथ्यापङ्क्तिरार्षी पङ्क्तिर्वा, (६७) सप्तषष्ट्याः पथ्याबृहती, (६९, ७१) एकोनसप्ततितमैकसप्ततितमयोश्चोपरिष्टाद्बृहती छन्दांसि ॥

इ॒यं नारी॑ पतिल॒ोकं वृ॑णा॒ना नि प॑द्यत॒ उप॑ त्वा मर्त्य॒ प्रेत॑म् ।
धर्मं॑ पुरा॒णम॑नुपा॒लय॑न्ती॒ तस्यै॑ प्र॒जां द्रवि॑णं चे॒ह धे॑हि ॥१॥
इ॒यम् । नारी॑ । प॒ति॒ऽल॒ोकम् । वृ॒णा॒ना । नि । प॒द्य॒ते॒ । उप॑ । त्वा॒ । म॒र्त्य॒ । प्र॒ऽइ॒तम् ।
धर्म॑म् । पु॒रा॒णम् । अ॒नु॒ऽपा॒लय॑न्ती । तस्यै॑ । प्र॒ऽजाम् । द्रवि॑णम् । च॒ । इ॒ह । धे॒हि॒ ॥ १ ॥

XVIII.2.58 Wrap about thee of kine a protection from the fire; cover thyself up with grease and fatness, lest the bold one, exulting with violence, shake thee strongly about, intending to consume thee.

XVIII.2.59 Taking the staff from the hand of the deceased man, together with hearing, splendor, strength—thou just there, here may we, rich in heroes, conquer all scorners (and) evil plotters.

XVIII.2.60 Taking the bow from the hand of the dead man, together with authority, splendor, strength—take thou hold upon much prosperous good; come thou hitherward unto the world of the living.

Yama

XVIII.3.1 This woman choosing her husband's world, lies down by thee that art departed, O mortal, continuing to keep (her) ancient duty; to her assign thou here progeny and property.

उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुप शेष एहि ।
हस्तग्राभस्य दधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ ॥२॥
अपश्यं युवतिं नीयमानां जीवां मृतेभ्यः परिणीयमानाम् ।
अन्धेन यत्तमसा प्रावृतासीत्प्राक्तो अपाचीमनयं तदेनाम् ॥३॥
प्रजानत्यघ्न्ये जीवलोकं देवानां पन्थामनुसंचरन्ती ।
अयं ते गोपतिस्तं जुषस्व स्वर्गं लोकमधि रोहयैनम् ॥४॥
उप द्यामुप वेतसमवत्तरो नदीनाम् । अग्ने पित्तमपामसि ॥५॥
यं त्वमग्ने समदहस्तमु निर्वापया पुनः ।
क्याम्बूरत्र रोहतु शाण्डदूर्वा व्यल्कशा ॥६॥
इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व ।
संवेशने तन्वा३ चारुरेधि प्रियो देवानां परमे सधस्थे ॥७॥

उत् । ईर्ष्व । नारि । अभि । जीवऽलोकम् । गतऽअसुम् । एतम् । उप । शेषे । आ । इहि ।
हस्तऽग्राभस्य । दधिषोः । तव । इदम् । पत्युः । जनिऽत्वम् । अभि । सम् । बभूथ ॥ २ ॥
अपश्यम् । युवतिम् । नीयमानाम् । जीवाम् । मृतेभ्यः । परिऽनीयमानाम् । अन्धेन ।
यत् । तमसा । प्रावृता । आसीत् । प्राक्तः । अपाचीम् । अनयम् । तत् । एनाम् ॥ ३ ॥
प्रऽजानती । अघ्न्ये । जीवऽलोकम् । देवानाम् । पन्थाम् । अनुऽसंचरन्ती ।
अयम् । ते । गोऽपतिः । तम् । जुषस्व । स्वःऽगम् । लोकम् । अधि । रोहय । एनम् ॥४॥
उप । द्याम् । उप । वेतसम् । अवत्ऽतरः । नदीनाम् । अग्ने । पित्तम् । अपाम् । असि ॥
यम् । त्वम् । अग्ने । समऽअदहः । तम् । ऊं इति । निः । वापय । पुनः ।
क्याम्बूः । अत्र । रोहतु । शाण्डऽदूर्वा । विऽअल्कशा ॥ ६ ॥
इदम् । ते । एकम् । परः । ऊं इति । ते । एकम् । तृतीयेन । ज्योतिषा । सम् । विशस्व ।
समऽवेशने । तन्वा३ । चारुः । एधि । प्रियः । देवानाम् । परमे । सधऽस्थे ॥ ७ ॥

XVIII.3.2 Go up, O woman, to the world of the living; thou liest by this one who is deceased: come to him who grasps thy hand, thy second spouse thou hast now entered into the relation of wife to husband.

XVIII.3.3 I saw the maiden being led, being led about, alive, for the dead; as she was enclosed with blind darkness, then I let her off-ward from in front.

XVIII.3.4 Foreknowing, O inviolable one, the world of the living, moving together (with him) upon the road of the gods – this is thy herdsman; enjoy him; make him ascend to the heavenly world.

Agni

XVIII.3.5 Unto sky, unto reed, more helpful of streams; O Agni, gall of the waters art thou.

XVIII.3.6 Whom thou, O Agni, didst consume, him do thou extinguish again; let there grow here the kyāmbū, the śandadūrva, the vyalkaśā.

Yama

XVIII.3.7 Here is one for thee, beyond is one for thee; enter thou into union with the third light; at entrance be thou fair with (thy) body, loved of the gods in the highest station.

उत्तिष्ठ प्रेहि प्र द्रवौकः कृणुष्व सलिले सधस्थे ।
तत्र त्वं पितृभिः संविदानः सं सोमेन मदस्व सं स्वधाभिः ॥८॥
प्र च्यवस्व तन्वं१ सं भरस्व मा ते गात्रा वि हायि मो शरीरम् ।
मनो निविष्टमनुसंविशस्व यत्र भूमेर्जुषसे तत्र गच्छ ॥९॥
वर्चसा मां पितरः सोम्यासो अञ्जन्तु देवा मधुना घृतेन ।
चक्षुषे मा प्रतरं तारयन्तो जरसे मा जरदष्टिं वर्धन्तु ॥१०॥
वर्चसा मां समनक्त्वग्निर्मेधां मे विष्णुर्न्यनक्त्वासन् ।
रयिं मे विश्वे नि यच्छन्तु देवाः स्योना मापः पवनैः पुनन्तु ॥११॥
मित्रावरुणा परि मामधातामादित्या मा स्वरवो वर्धयन्तु ।
वर्चो म इन्द्रो न्यनक्तु हस्तयोर्जरदष्टिं मा सविता कृणोतु ॥१२॥
यो ममार प्रथमो मर्त्यानां यः प्रेयाय प्रथमो लोकमेतम् ।
वैवस्वतं संगमनं जनानां यमं राजानं हविषा सपर्यत ॥१३॥

उत् । तिष्ठ । प्र । इहि । प्र । द्रव । ओकः । कृणुष्व । सलिले । सधऽस्थे ।
तत्र । त्वम् । पितृऽभिः । सम्ऽविदानः । सम् । सोमेन । मदस्व । सम् । स्वधाभिः ॥ ८ ॥
प्र । च्यवस्व । तन्वम् । सम् । भरस्व । मा । ते । गात्रा । वि । हायि । मो इति । शरीरम् ।
मनः । निऽविष्टम् । अनुऽसंविशस्व । यत्र । भूमेः । जुषसे । तत्र । गच्छ ॥ ९ ॥
वर्चसा । माम् । पितरः । सोम्यासः । अञ्जन्तु । देवाः । मधुना । घृतेन ।
चक्षुषे । मा । प्रऽतरम् । तारयन्तः । जरसे । मा । जरत्ऽअष्टिम् । वर्धन्तु ॥ १० ॥
वर्चसा । माम् । सम् । अनक्तु । अग्निः । मेधाम् । मे । विष्णुः । नि । अनक्तु । आसन् ।
रयिम् । मे । विश्वे । नि । यच्छन्तु । देवाः । स्योनाः । मा । आपः । पवनैः । पुनन्तु ॥ ११ ॥
मित्रावरुणा । परि । माम् । अधाताम् । आदित्याः । मा । स्वरवः । वर्धयन्तु ।
वर्चः । मे । इन्द्रः । नि । अनक्तु । हस्तयोः । जरत्ऽअष्टिम् । मा । सविता । कृणोतु ॥१२॥
यः । ममार । प्रथमः । मर्त्यानाम् । यः । प्रऽइयाय । प्रथमः । लोकम् । एतम् ।
वैवस्वतम् । समऽगमनम् । जनानाम् । यमम् । राजानम् । हविषा । सपर्यत ॥ १३ ॥

XVIII.3.8 Rise thou, go forth, run forth; make thee a home in the sea (as) station: there do thou, in concord with the Fathers, revel with soma with the svadhās.

XVIII.3.9 Start forward, collect thy body; let not thy limbs nor thy frame be left out; enter together after thy mind that has entered; wherever in the world thou enjoyest, thither go.

XVIII.3.10 Let the soma-drinking Fathers anoint me with splendor, the gods with honey, with ghee; making me pass further on unto sight, let them increase me, attaining old age, unto old age.

XVIII.3.11 Let Agni anoint completely with splendor; let Vishnu anoint wisdom into my mouth; let all the gods fix wealth upon me; let pleasant waters purify me with purifiers.

XVIII.3.12 Mitra and Varuna have enclosed me; let the sacrificial posts of Aditi increase me; let Indra anoint splendor into my hands; let Savitar make me one attaining old age.

XVIII.3.13 Him who died first of mortals, who went forth first to that world, Vivasvant's son, assembler of people, king Yama honor ye with oblation.

परा यात पितर आ च यातायं वो यज्ञो मधुना समक्तः ।
दत्तो अस्मभ्यं द्रविणेह भद्रं रयिं च नः सर्ववीरं दधात ॥१४॥
कण्वः कक्षीवान्पुरुमीढो अगस्त्यः श्यावाश्वः सोभर्यर्चनानाः ।
विश्वामित्रोयं जमदग्निरत्रिरवन्तु नः कश्यपो वामदेवः ॥१५॥
विश्वामित्र जमदग्ने वसिष्ठ भरद्वाज गोतम वामदेव ।
शर्दिर्नो अत्रिरग्रभीन्नमोभिः सुसंशासः पितरो मृडता नः ॥१६॥
कस्ये मृजाना अति यन्ति रिप्रमायुर्दधानाः प्रतरं नवीयः ।
आप्यायमानाः प्रजया धनेनाध स्याम सुरभयो गृहेषु ॥१७॥
अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मधुनाभ्यञ्जते ।
सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमासु गृह्णते ॥१८॥
यद्वो मुद्रं पितरः सोम्यं च तेनो सचध्वं स्वयशसो हि भूत ।
ते अर्वाणः कवय आ शृणोत सुविदत्रा विदथे हूयमानाः ॥१९॥

परा । यात । पितरः । आ । च । यात । अयम् । वः । यज्ञः । मधुना । सम्ऽअक्तः । दत्तो इति । अस्मभ्यम् । द्रविणा । इह । भद्रम् । रयिम् । च । नः । सर्वऽवीरम् । दधात ॥१४॥
कण्वः । कक्षीवान् । पुरुऽमीढः । अगस्त्यः । श्यावऽअश्वः । सोभरी । अर्चनानाः ।
विश्वामित्रः । अयम् । जमत्ऽअग्निः । अत्रिः । अवन्तु । नः । कश्यपः । वामऽदेवः ॥ १५ ॥
विश्वामित्र । जमत्ऽअग्ने । वसिष्ठ । भरत्ऽवाज । गोतम । वामऽदेव ।
शर्दिः । नः । अत्रिः । अग्रभीत् । नमःऽभिः । सुऽसंशासः । पितरः । मृडत । नः ॥ १६ ॥
कस्यं । मृजानाः । अति । यन्ति । रिप्रम् । आयुः । दधानाः । प्रऽतरम् । नवीयः ।
आऽप्यायमानाः । प्रऽजया । धनेन । अध । स्याम । सुरभयः । गृहेषु ॥ १७ ॥
अञ्जते । वि । अञ्जते । सम् । अञ्जते । क्रतुम् । रिहन्ति । मधुना । अभि । अञ्जते ।
सिन्धोः । उत्ऽश्वासे । पतयन्तम् । उक्षणम् । हिरण्यऽपावाः । पशुम् । आसु । गृह्णते ॥१८॥
यत् । वः । मुद्रम् । पितरः । सोम्यम् । च । तेनो इति । सचध्वम् । स्वऽयशसः । हि । भूत । ते । अर्वाणः । कवयः । आ । शृणोत । सुऽविदत्राः । विदथे । हूयमानाः ॥१९॥

XVIII.3.14 Go away, ye Fathers, and come; this sacrifice is all anointed with honey for you; both give to us here excellent property, and assign to us wealth having all heroes.

XVIII.3.15 Let Kanva, Kakshīvant, Purumdha, Agastya, Śyāvācva, Sobharī, Archanānas, Viśvāmitra, Jamadagni here Atri, Kaśyapa, Vāmadeva, aid us.

XVIII.3.16 O Viśvāmitra, Jamadagni, Vasistha, Bhāradvāja, Gotama, Vāmadva — Atri hath taken our śardis with obeisances; ye Fathers of good report, be gracious to us.

XVIII.3.17 They overpass defilement, wiping (it) off in the metal bowl, assuming further on newer life-time, filling themselves up with progeny and riches; then may we be of good odor in the houses.

XVIII.3.18 They anoint, they anoint out, they anoint together; they lick the rite, they smear with honey; the bull flying in the uphearing of the river, the victim do the gold-purifiers seize in them. [Rg.IX.86.43.Var.]

XVIII.3.19 What of you is joyous, O Fathers, and delectable, there will be at hand, for ye are of own splendor; do ye, rapid poets, listen, beneficent, invoked at the council.

ये अत्रयो अङ्गिरसो नवग्वा इष्टावन्तो रातिषाचो दधानाः ।
दक्षिणावन्तः सुकृतो य उ स्थासद्यास्मिन्बर्हिषि मादयध्वम् ॥२०॥ (१७)
अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशशानाः ।
शुचीदयन्दीध्यत उक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन् ॥२१॥
सुकर्माणः सुरुचो देवयन्तो अयो न देवा जनिमा धमन्तः ।
शुचन्तो अग्निं वावृधन्त इन्द्रमुर्वीं गव्यां परिषदं नो अक्रन् ॥२२॥
आ यूथेव क्षुमति पश्वो अख्यद्देवानां जनिमान्त्युग्रः ।
मर्तानांश्चिदुर्वशीरकृप्रन्वृधे चिदर्य उपरस्यायोः ॥२३॥
अकर्म ते स्वपसो अभूम ऋतमवस्रन्नुषसो विभातीः ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥२४॥
इन्द्रो मा मरुत्वान्प्राच्या दिशः पातु बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥२५॥

ये । अत्रयः । अङ्गिरसः । नवऽग्वाः । इष्टऽवन्तः । रातिऽसाचः । दधानाः । दक्षिणाऽवन्तः ।
सुऽकृतः । ये । ऊं इति । स्थ । आऽसद्य । अस्मिन् । बर्हिषि । मादयध्वम् ॥ २० ॥
अध । यथा । नः । पितरः । परासः । प्रत्नासः । अग्ने । ऋतम् । आऽशशानाः ।
शुचि । इत् । अयन् । दीध्यतः । उक्थऽशासः । क्षाम । भिन्दन्तः । अरुणीः । अप । व्रन् ॥
सुऽकर्माणः । सुऽरुचः । देवऽयन्तः । अयः । न । देवाः । जनिम । धमन्तः ।
शुचन्तः । अग्निम् । ववृधन्तः । इन्द्रम् । उर्वीम् । गव्याम् । परिऽसदम् । नः । अक्र
आ । यूथाऽइव । क्षुऽमति । पश्वः । अख्यत् । देवानाम् । जनिम । अन्ति । उग्रः
मर्तासः । चित् । उर्वशीः । अकृप्रन् । वृधे । चित् । अर्यः । उपरस्य । आयोः ॥२
अकर्म । ते । सुऽअपसः । अभूम । ऋतम् । अवस्रन् । उषसः । विऽभातीः ।
विश्वम् । तत् । भद्रम् । यत् । अवन्ति । देवाः । बृहत् । वदेम । विदथे । सुऽवीराः ॥२
इन्द्रः । मा । मरुत्वान् । प्राच्याः । दिशः । पातु । बाहुऽच्युता । पृथिवी । द्याम् [illegible]
उपरि । लोकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह ।

XVIII.3.20 Ye who are Atris, Añgirases, Navagvas, having sacrificed, attached to giving, bestowers, and who are rich in sacrificial fees, well-doing--do ye revel, sitting on this barhis.

XVIII.3.21 So then as our distant Fathers, the ancient ones, O Agni, sharpening the rite: they went to the bright, they shone, praising with song; splitting the ground, they uncovered the ruddy ones.

XVIII.3.22 Of good actions, well-shining, pious, heavenly ones, forging the generations as (smiths forge) metal, brightening Agni, increasing Indra, they have made for us a wide conclave, rich in kine.

XVIII.3.23 As herds at food, the formidable one hath looked over the cattle, the births of the gods, near by; mortals have lamented the urvaśis, unto the increase of the pious, of the next man. [Rg IV.2.18]

XVIII.3.24 We have made (sacrifices) for thee; we have been very active; the illuminating dawns have shone upon (our) rite; all that is excellent which the gods favor; may we talk big at the council, having good heroes. [Rg.IV.2.19 and II.23.19]

XVIII.3.25 Let Indra with the Maruts protect me from the eastern quarter; arm-moved (is) the earth, as it were to the sky above; to the world-makers, the road-makers, do we sacrifice, whoever of you are here, sharing in the oblation of the gods.

धाता मा निर्ऋत्या दक्षिणाया दिशः पातु बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥२६॥
अदितिर्मादित्यैः प्रतीच्या दिशः पातु बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥२७॥
सोमो मा विश्वैर्देवैरुदीच्या दिशः पातु बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥२८॥
धर्ता ह त्वा धरुणो धारयाता ऊर्ध्वं भानुं सविता द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥२९॥
प्राच्यां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥३०॥(१५)
दक्षिणायां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥३१॥

धाता । मा । निःऽऋत्याः । दक्षिणायाः । दिशः । पातु । बाहुऽच्युता । पृथिवी । द्याम्ऽइव । उपरि ।
लोकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह । स्थ ॥ २६ ॥
अदितिः । मा । आदित्यैः । प्रतीच्याः । दिशः । पातु । बाहुऽच्युता । पृथिवी । द्याम्ऽइव । उपरि ।
लोकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह । स्थ ॥ २७ ॥
सोमः । मा । विश्वैः । देवैः । उदीच्याः । दिशः । पातु । बाहुऽच्युता । पृथिवी । द्याम्ऽइव ।
उपरि । लोकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह । स्थ ॥ २८ ॥
धर्ता । ह । त्वा । धरुणः । धारयातै । ऊर्ध्वम् । भानुम् । सविता । द्याम्ऽइव । उपरि ।
लोकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह । स्थ ॥ २९ ॥
प्राच्याम् । त्वा । दिशि । पुरा । सम्ऽवृतः । स्वधायाम् । आ । दधामि । बाहुऽच्युता । पृथिवी ।
द्याम्ऽइव । उपरि । लोकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह । स्थ ॥
दक्षिणायाम् । त्वा । दिशि । पुरा । सम्ऽवृतः । स्वधायाम् । आ । दधामि । बाहुऽच्युता । पृथिवी ।
द्याम्ऽइव । उपरि । लाकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह । स्थ ॥

XVIII.3.26 Let Dhātar protect me from perdition from the souhtern quarter; arm-moved etc. etc.

XVIII.3.27 Let Aditi with the Ādityas protect me from the western quarter; arm-moved etc. etc.

XVIII.3.28 Let Soma with all the gods protect me from the northern quarter; arm-moved etc. etc.

XVIII.3.29 Dhartar the maintainer shall maintain thee aloft, as Savitar the light to the sky above; to the world-makers etc. etc.

XVIII.3.30 In the eastern quarter, away from approach, do I set thee in svadhā; arm-moved etc. etc.

XVIII.3.31 In the southern quarter, away etc. etc.

प्रतीच्यां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥३२॥

उदीच्यां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥३३॥

ध्रुवायां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥३४॥

ऊर्ध्वायां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥३५॥

धर्तासि धरुणोसि वंसगोसि ॥३६॥

उदपूरसि मधुपूरसि वातपूरसि ॥३७॥

प्रतीच्याम् । त्वा । दिशि । पुरा । सम्ऽवृतः । स्वधायाम् । आ । दधामि । बाहुऽच्युता । पृथिवी । द्यामऽइव । उपरि । लोकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह । स्थ ॥

उदीच्याम् । त्वा । दिशि । पुरा । सम्ऽवृतः । स्वधायाम् । आ । दधामि । बाहुऽच्युता । पृथिवी । द्यामऽइव । उपरि । लोकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह । स्थ ॥ ३३ ॥

ध्रुवायाम् । त्वा । दिशि । पुरा । सम्ऽवृतः । स्वधायाम् । आ । दधामि । बाहुऽच्युता । पृथिवी । द्यामऽइव । उपरि । लोकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह । स्थ ॥ ३४ ॥

ऊर्ध्वायाम् । त्वा । दिशि । पुरा । सम्ऽवृतः । स्वधायाम् । आ । दधामि । बाहुऽच्युता । पृथिवी । द्यामऽइव । उपरि । लोकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह । स्थ ॥ ३५ ॥

धर्ता । असि । धरुणः । असि । वंसगः । असि ॥ ३६ ॥

उदऽपूः । असि । मधुऽपूः । असि । वातऽपूः । असि ॥ ३७ ॥

XVIII.3.32 In the western quarter, away etc. etc.

XVIII.3.33 In the northern quarter, away etc. etc.

XVIII.3.34 In the fixed quarter, away etc. etc.

XVIII.3.35 In the upward quarter, away etc. etc.

XVIII.3.36 Dhartar art thou; maintaining art thou; bull art thou.

XVIII.3.37 Water-purifying art thou; honey-purifying art thou; wind-purifying art thou.

इतश्च मामुतश्चावतां यमे इव यतमाने यदैतम् ।
प्र वां भरन्मानुषा देवयन्तो आ सीदतां स्वमु लोकं विदाने ॥३८॥
स्वासस्थे भवतमिन्दवे नो युजे वां ब्रह्म पूर्व्यं नमोभिः ।
वि श्लोक एति पथ्येव सूरिः शृण्वन्तु विश्वे अमृतास एतत् ॥३९॥
त्रीणि पदानि रूपो अन्वरोहच्चतुष्पदीमन्वैतद्व्रतेन ।
अक्षरेण प्रति मिमीते अर्कमृतस्य नाभावभि सं पुनाति ॥४०॥ (१९)
देवेभ्यः कमवृणीत मृत्युं प्रजायै किममृतं नावृणीत ।
बृहस्पतिर्यज्ञमतनुत ऋषिः प्रियां यमस्तन्वमा रिरेच ॥४१॥
त्वमग्न ईडितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वा ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि ॥४२॥
आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय ।
पुत्रेभ्यः पितरस्तस्य वस्वः प्र यच्छत त इहोर्जं दधात ॥४३॥

इतः । च । मा । अमुतः । च । अवताम् । यमे इवेति यमेऽइव । यतमाने इति । यत् । ऐतम् ।
प्र । वाम् । भरन् । मानुषाः । देवऽयन्तः । आ । सीदताम् । स्वम् । ऊं इति । लोकम् । विदाने इति ॥ ३८ ॥
स्वासस्थे इति सुऽआसस्थे । भवतम् । इन्दवे । नः । युजे । वाम् । ब्रह्म । पूर्व्यम् । नमःऽभिः ।
वि । श्लोकः । एति । पथ्याऽइव । सूरिः । शृण्वन्तु । विश्वे । अमृतासः । एतत् ॥ ३९ ॥
त्रीणि । पदानि । रूपः । अनु । अरोहत् । चतुःऽपदीम् । अनु । एतत् । व्रतेन ।
अक्षरेण । प्रति । मिमीते । अर्कम् । ऋतस्य । नाभौ । अभि । सम् । पुनाति ॥ ४० ॥
देवेभ्यः । कम् । अवृणीत । मृत्युम् । प्रऽजायै । किम् । अमृतम् । न । अवृणीत ।
बृहस्पतिः । यज्ञम् । अतनुत । ऋषिः । प्रियाम् । यमः । तन्वम् । आ । रिरेच ॥ ४१ ॥
त्वम् । अग्ने । ईडितः । जातऽवेदः । अवाट् । हव्यानि । सुरभीणि । कृत्वा ।
प्र । अदाः । पितृऽभ्यः । स्वधया । ते । अक्षन् । अद्धि । त्वम् । देव । प्रऽयता । हवींषि ॥४२॥
आसीनासः । अरुणीनाम् । उपऽस्थे । रयिम् । धत्त । दाशुषे । मर्त्याय ।
पुत्रेभ्यः । पितरः । तस्य । वस्वः । प्र । यच्छत । ते । इह । ऊर्जम् । दधात ॥ ४३ ॥

XVIII.3.38 Both from here and from yonder let them aid me. As ye (du.) (neut.) went pressing on (root yat) like two twins, god-loving men bring you forward; set ye, (each) on thine own place, knowing (it).

XVIII.3.39 Be ye comfortable for our soma. I yoke for you ancient worship with obeisance; the song goes forth like a patron on his road; let all the immortals hear that.

XVIII.3.40 Three steps the form ascended, it went after the four-footed one with its course; it matches the song with the syllable; in the navel of right it purifies.

XVIII.3.41 For the gods he chose death; for his progeny did he not choose immortality ? Bṛhaspati (as) seer extended the sacrifice; Yama left his dear self.

XVIII.3.42 Thou, O agni, Jātavedas, being praised, hast carried the offering, having made them fragrant; thou hast given to the Fathers; they have eaten after their wont; eat thou, O god, the presented oblations,

XVIII.3.43 Sitting in the lap of the ruddy ones, assign ye wealth to your mortal worshiper, of that good, O Fathers, present ye to your sons; do ye bestow refreshment here.

अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः ।
अत्तो हवींषि प्रयतानि बर्हिषि रयिं च नः सर्ववीरं दधात ॥४४॥
उपहूता नः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥४५॥
ये नः पितुः पितरो ये पितामहा अनूजहिरे सोमपीथं वसिष्ठाः ।
तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु ॥४६॥
ये तातृषुर्देवत्रा जेहमाना होत्राविदः स्तोमतष्टासो अर्कैः ।
आग्ने याहि सहस्रं देववन्दैः सत्यैः कविभिर्ऋषिभिर्घर्मसद्भिः ॥४७॥
ये सत्यासो हविरदो हविष्पा इन्द्रेण देवैः सरथं तुरेण ।
आग्ने याहि सुविदत्रेभिरर्वाङ् परैः पूर्वैर्ऋषिभिर्घर्मसद्भिः ॥४८॥
उप सर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवाम् ।
ऊर्णम्रदाः पृथिवी दक्षिणावत एषा त्वा पातु प्रपथे पुरस्तात् ॥४९॥

अग्निऽस्वात्ताः । पितरः । आ । इह । गच्छत । सदःसदः । सदत । सुऽप्रनीतयः ।
अत्तो इति । हवींषि । प्रऽयतानि । बर्हिषि । रयिम् । च । नः । सर्वऽवीरम् । दधात ॥४४॥
उपऽहूताः । नः । पितरः । सोम्यासः । बर्हिष्येषु । निऽधिषु । प्रियेषु । ते । आ ।
गमन्तु । ते । इह । श्रुवन्तु । अधि । ब्रुवन्तु । ते । अवन्तु । अस्मान् ॥ ४५ ॥
ये । नः । पितुः । पितरः । ये । पितामहाः । अनुऽजहिरे । सोमऽपीथम् । वसिष्ठाः ।
तेभिः । यमः । सम्ऽरराणः । हवींषि । उशन् । उशत्ऽभिः । प्रतिऽकामम् । अत्तु ॥४६॥
ये । ततृषुः । देवऽत्रा । जेहमानाः । होत्राऽविदः । स्तोमऽतष्टासः । अर्कैः । आ । अग्ने ।
याहि । सहस्रम् । देवऽवन्दैः । सत्यैः । कविऽभिः । ऋषिऽभिः । घर्मसत्ऽभिः ॥४७॥
ये । सत्यासः । हविःऽअदः । हविःऽपाः । इन्द्रेण । देवैः । सऽरथम् । तुरेण । आ ।
अग्ने । याहि । सुऽविदत्रेभिः । अर्वाङ् । परैः । पूर्वैः । ऋषिऽभिः । घर्मसत्ऽभिः ॥४८॥
उप । सर्प । मातरम् । भूमिम् । एताम् । उरुऽव्यचसम् । पृथिवीम् । सुऽशेवाम् ।
ऊर्णऽम्रदाः । पृथिवी । दक्षिणाऽवते । एषा । त्वा । पातु । प्रऽपथे । पुरस्तात् ॥४९॥

XVIII.3.44 Ye fire-sweetened Fathers, come hither; sit on each seat, well-conducting ones; eat on the barhis the presented oblations, and assign to us wealth having all heroes. (Rg.X.15.11)

XVIII.3.45 Called unto (are) our delectable Fathers, to dear deposits on the barhis; let them come; let them listen here; let them bless, let them aid us. (Rg.X.15.5)

XVIII.3.46 They who, our father's fathers, who (his) grandfathers, followed after the soma-drinking, best ones — with them let Yama, sharing his gift of oblations, he eager with them eager, eat at pleasure. (Rg.X.15.8)

XVIII.3.47 They who thirsted panting among the gods, knowers of offering, praise-fashioned, with songs – come, O Agni, with the thousand god-revering true poets, seers sitting at the ghrama.

XVIII.3.48 The true, oblation-eating, oblation-drinking (ones) that (go) in alliance with the gods, with strong Indra — come hither ward, O Agni, with the beneficent, exalted, ancient seers, sitting at the gharma. (cf. Rg.X.15.9)

XVIII.3.49 Approach thou this mother earth, the wide-expanded earth, the very propitious; the earth (is) soft as wool to him who has sacrificial gifts; let her protect thee on the forward road in front. (cf. Rg.X.15.10)

उच्छ्वञ्चस्व पृथिवि मा नि बाधथाः सूपायनास्मै भव सूपसर्पणा ।
माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि ॥५०॥ (१०)
उच्छ्वञ्चमाना पृथिवी सु तिष्ठतु सहस्रं मित उप हि श्रयन्ताम् ।
ते गृहासो घृतश्चुतः स्योना विश्वाहास्मै शरणाः सन्त्वत्र ॥५१॥
उत्ते स्तभ्नामि पृथिवीं त्वत्परीमं लोगं निदधन्मो अहं रिषम् ।
एतां स्थूणां पितरो धारयन्ति ते तत्र यमः सादना ते कृणोतु ॥५२॥
इममग्ने चमसं मा वि जिह्वरः प्रियो देवानामुत सोम्यानाम् ।
अयं यश्चमसो देवपानस्तस्मिन्देवा अमृता मादयन्ताम् ॥५३॥
अथर्वा पूर्णं चमसं यमिन्द्रायाबिभर्वाजिनीवते ।
तस्मिन्कृणोति सुकृतस्य भक्षं तस्मिन्निन्दुः पवते विश्वदानीम् ॥५४॥
यत्ते कृष्णः शकुन आतुतोद पिपीलः सर्प उत वा श्वापदः ।
अग्निष्टद्विश्वादगदं कृणोतु सोमश्च यो ब्राह्मणाँ आविवेश ॥५५॥

उत् । श्वञ्चस्व । पृथिवि । मा । नि । बाधथाः । सुऽउपायना । अस्मै । भव । सुऽउपसर्पणा ।
माता । पुत्रम् । यथा । सिचा । अभि । एनम् । भूमे । ऊर्णुहि ॥ ५० ॥
उत्ऽश्वञ्चमाना । पृथिवी । सु । तिष्ठतु । सहस्रम् । मितः । उप । हि । श्रयन्ताम् ।
ते । गृहासः । घृतऽश्चुतः । स्योनाः । विश्वाहा । अस्मै । शरणाः । सन्तु । अत्र ॥५१॥
उत् । ते । स्तभ्नामि । पृथिवीम् । त्वत् । परि । इमम् । लोगम् । निऽदधत् । मो इति । अहम् ।
रिषम् । एताम् । स्थूणाम् । पितरः । धारयन्ति । ते । तत्र । यमः । सदना । ते । कृणोतु ॥
इमम् । अग्ने । चमसम् । मा । वि । जिह्वरः । प्रियः । देवानाम् । उत । सोम्यानाम् ।
अयम् । यः । चमसः । देवऽपानः । तस्मिन् । देवाः । अमृताः । मादयन्ताम् ॥ ५३ ॥
अथर्वा । पूर्णम् । चमसम् । यम् । इन्द्राय । अबिभः । वाजिनीऽवते ।
तस्मिन् । कृणोति । सुऽकृतस्य । भक्षम् । तस्मिन् । इन्दुः । पवते । विश्वऽदानीम् ॥५४॥
यत् । ते । कृष्णः । शकुनः । आऽतुतोद । पिपीलः । सर्पः । उत । वा । श्वापदः । अग्निः ।
तत् । विश्वऽअत् । अगदम् । कृणोतु । सोमः । च । यः । ब्राह्मणान् । आऽविवेश ॥५५॥

Bhūmi : Earth

XVIII.3.50 Swell thou up, O earth; do not press down; be to him easy of access, easy of approach; as a mother her son with her skirt, do thou, O earth, cover him. (cf.Rg.X.18.11)

XVIII.3.51 Let the earth kindly remain swelling up, for let a thousand props support it; let these houses, dripping with ghee, pleasant, be forever a refuge for him there. (Rg. X.18.12.Var.)

XVIII.3.52 I brace up the earth from about thee; setting down this clod, let me take no harm; this pillar do the Fathers maintain for thee; let Yama there make seats for thee. (Rg.X.16.8)

XVIII.3.53 This bowl, O Agni, do not warp; (it is) dear to the gods and the delectable (Fathers); this bowl here for the gods to drink from – in it let the immortal gods revel. (cf.Rg.X.16.8)

Indra

XVIII.3.54 The bowl that Atharvan bore full to Indra the vigorous, in that he makes a draught of what is well done; in that, soma ever purifies itself.

XVIII.3.55 What of thee the black bird thrust at, the ant, the serpent, or also the beast of prey, let the all-eating (viśva-ad) Agni make that free from disease, and the soma that hath entered the Brahmans.

पयस्वतीरोषधयः पयस्वन्मामकं पयः ।
अपां पयसो यत्पयस्तेन मा सह शुम्भतु ॥५६॥
इमा नारीरविधवाः सुपत्नीराञ्जनेन सर्पिषा सं स्पृशन्ताम् ।
अनश्रवो अनमीवाः सुरत्ना आ रोहन्तु जनयो योनिमग्रे ॥५७॥
सं गच्छस्व पितृभिः सं यमेनेष्टापूर्तेन परमे व्यो॑मन् ।
हित्वावद्यं पुनरस्तमेहि सं गच्छतां तन्वा॑ सुवर्चाः ॥५८॥
ये नः पितुः पितरो ये पितामहा य आविविशुरुर्व१न्तरिक्षम् ।
तेभ्यः स्वराडसुनीतिर्नो अद्य यथावशं तन्वः॑ कल्पयाति ॥५९॥
शं ते नीहारो भवतु शं ते प्रुष्वाव शीयताम् ।
शीतिके शीतिकावति ह्लादिके ह्लादिकावति ।
मण्डूक्य१प्सु शं भुव इमं स्व१ग्निं शमय ॥६०॥ (१८)
विवस्वान्नो अभयं कृणोतु यः सुत्रामा जीरदानुः सुदानुः ।
इहेमे वीरा बहवो भवन्तु गोमदश्ववन्मय्यस्तु पुष्टम् ॥६१॥

पयस्वतीः । ओषधयः । पयस्वत् । मामकम् । पयः ।
अपाम् । पयसः । यत् । पयः । तेन । मा । सह । शुम्भतु ॥ ५६ ॥
इमाः । नारीः । अविधवाः । सुऽपत्नीः । आऽअञ्जनेन । सर्पिषा । सम् । स्पृशन्ताम् ।
अनश्रवः । अनमीवाः । सुऽरत्नाः । आ । रोहन्तु । जनयः । योनिम् । अग्रे ॥ ५७ ॥
सम् । गच्छस्व । पितृऽभिः । सम् । यमेन । इष्टापूर्तेन । परमे । विऽओमन् ।
हित्वा । अवद्यम् । पुनः । अस्तम् । आ । इहि । सम् । गच्छताम् । तन्वा॑ । सुऽवर्चाः ॥
ये । नः । पितुः । पितरः । ये । पितामहाः । ये । आऽविविशुः । उरु । अन्तरिक्षम् ।
तेभ्यः । स्वऽराट् । असुऽनीतिः । नः । अद्य । यथाऽवशम् । तन्वः॑ । कल्पयाति ॥ ५९ ॥
शम् । ते । नीहारः । भवतु । शम् । ते । प्रुष्वा । अव । शीयताम् । शीतिके । शीतिकाऽवति ।
ह्लादिके । ह्लादिकाऽवति । मण्डूकी । अप्ऽसु । शम् । भुवः । इमम् । सु । अग्निम् । शमय ॥६०॥
विवस्वान् । नः । अभयम् । कृणोतु । यः । सुऽत्रामा । जीरऽदानुः । सुऽदानुः ।
इह । इमे । वीराः । बहवः । भवन्तु । गोऽमत् । अश्वऽवत् । मयि । अस्तु । पुष्टम् ॥ ६१ ॥

Apaḥ

XVIII.3.56 Rich in milk are the herbs; rich in milk is my milk; what is the milk of the milk of the waters, therewith let one beautify me.

Yama

XVIII.3.57 Let these women, not widows, well-spoused, thouch themselves with ointment, with butter; tearless, without disease, with good treasures, let the wives ascend first to the place of union.

XVIII.3.58 Unite thyself with the Fathers, with Yama, with thy sacred and charitable works in the highest firmament; abandoning what is reproachful, come again home; — let them unite himself with a body, very splendid. (Rg.X.14.8.Var.)

XVIII.3.59 They that are our father's fathers, that are (his) grandfathers, that entered the wide atmosphere — for them may the autocratic second life today shape our bodies as he will.

XVIII.3.60 Let the mist be weal for thee; let the frost fall down (as) weal for thee; O cool one, possessing cool ones; mayest thou be with weal a she-frog in the waters; kindly pacify thou this fire.

XVIII.3.61 Let Vivasvant make for us freedom from fear, he who is well-preserving, quick-giving, well-giving; let these heroes be many here; let there be in me prosperity rich in kine, rich in horses.

विवस्वान्नो अमृतत्वे दधातु परैतु मृत्युरमृतं न ऐतु ।
इमान्रक्षतु पुरुषाना जरिम्णो मो ष्वे॑षामसवो यमं गुः ॥६२॥
यो दध्रे अन्तरिक्षे न मह्ना पितॄणां कविः प्रमतिर्मतीनाम् ।
तमर्चत विश्वमित्रा हविर्भिः स नो यमः प्रतरं जीवसे धात् ॥६३॥
आ रोहत दिवमुत्तमामृषयो मा बिभीतन ।
सोमपाः सोमपायिन इदं वः क्रियते हविरगन्म ज्योतिरुत्तमम् ॥६४॥
प्र केतुना बृहता भात्यग्निरा रोदसी वृषभो रोरवीति ।
दिवश्चिदन्तादुपमामुदानडपामुपस्थे महिषो ववर्ध ॥६५॥
नाके सुपर्णमुप यत्पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा ।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥६६॥
इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥६७॥

विवस्वान् । नः । अमृतऽत्वे । दधातु । परा । एतु । मृत्युः । अमृतम् । नः । आ । एतु ।
इमान् । रक्षतु । पुरुषान् । आ । जरिम्णः । मो इति । सु । एषाम् । असवः । यमम् । गुः ॥ ६२ ॥

यः । दध्रे । अन्तरिक्षे । न । मह्ना । पितॄणाम् । कविः । प्रऽमतिः । मतीनाम् ।
तम् । अर्चत । विश्वऽमित्राः । हविःऽभिः । सः । नः । यमः । प्रऽतरम् । जीवसे । धात् ॥ ६३ ॥

आ । रोहत । दिवम् । उत्ऽतमाम् । ऋषयः । मा । बिभीतन । सोमऽपाः । सोम-
ऽपायिनः । इदम् । वः । क्रियते । हविः । अगन्म । ज्योतिः । उत्ऽतमम् ॥ ६४ ॥

प्र । केतुना । बृहता । भाति । अग्निः । आ । रोदसी इति । वृषभः । रोरवीति ।
दिवः । चित् । अन्तात् । उपऽमाम् । उत् । आनट् । अपाम् । उपऽस्थे । महिषः । ववर्ध ॥

नाके । सुऽपर्णम् । उप । यत् । पतन्तम् । हृदा । वेनन्तः । अभिऽअचक्षत । त्वा ।
हिरण्यऽपक्षम् । वरुणस्य । दूतम् । यमस्य । योनौ । शकुनम् । भुरण्युम् ॥ ६६ ॥

इन्द्र । क्रतुम् । नः । आ । भर । पिता । पुत्रेभ्यः । यथा ।
शिक्ष । नः । अस्मिन् । पुरुऽहूत । यामनि । जीवाः । ज्योतिः । अशीमहि ॥ ६७ ॥

XVIII.3.62 Let Vivasvant set us in immortality; let what is immortal come to us; let (him) defend these men until old age; let not their life-breaths go to Yama.

XVIII.3.63 He who maintains himself by his might, like (birds ?) in the atmosphere, poet of the Fathers, favorer of prayers – him praise ye, all befriended, with oblations; may that Yama give us to live further on.

XVIII.3.64 Ascend ye to the highest heaven; O seers, be not afraid; ye soma-drinkers, soma-drenchers, this oblation is made to you; we have gone to the highest light.

XVIII.3.65 Agni shines forth with great show; the bull roars loudly unto the two firmaments; (even) from the end of heaven he hath attained unto me in the lap of the waters the buffalo increased.

XVIII.3.66 As, longing with the heart, they looked upon thee, flying up (as) an eagle in the firmament, golden-winged messenger of Varuṇa, busy bird in the lair of Yama. (Rg.X.123.6; also Sv I.320, II.1196)

XVIII.3.67 O Indra, bring us ability, as a father to his sons; help us in this course, O much-invoked one; may we, living, attain to light. (Rg.VII.32.26; also Sv.I.259;II.806)

अपूपापिहितान्कुम्भान्यांस्ते देवा अधारयन् ।
ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुतः ॥६८॥
यास्ते धाना अनुकिरामि तिलमिश्राः स्वधावतीः ।
तास्ते सन्तु विभ्वीः प्रभ्वीस्तास्ते यमो राजानु मन्यताम् ॥६९॥
पुनर्देहि वनस्पते य एष निहितस्त्वयि ।
यथा यमस्य सादन आसातै विदथा वदन् ॥७०॥
आ रभस्व जातवेदस्तेजस्वद्धरो अस्तु ते ।
शरीरमस्य सं दहाथैनं धेहि सुकृतामु लोके ॥७१॥
ये ते पूर्वे परागता अपरे पितरश्च ये ।
तेभ्यो घृतस्य कुल्यैतु शतधारा व्युन्दती ॥७२॥
एतदा रोह वय उन्मृजानः स्वा इह बृहदु दीदयन्ते ।
अभि प्रेहि मध्यतो माप हास्थाः पितृणां लोकं प्रथमो यो अत्र ॥७३॥ (१५)

अपूपऽअपिहितान् । कुम्भान् । यान् । ते । देवाः । अधारयन् ।
ते । ते । सन्तु । स्वधाऽवन्तः । मधुऽमन्तः । घृतऽश्चुतः ॥ ६८ ॥
याः । ते । धानाः । अनुऽकिरामि । तिलऽमिश्राः । स्वधाऽवतीः ।
ताः । ते । सन्तु । विऽभ्वीः । प्रऽभ्वीः । ताः । ते । यमः । राजा । अनु । मन्यताम् ॥६९॥
पुनः । देहि । वनस्पते । यः । एषः । निऽहितः । त्वयि ।
यथा । यमस्य । सदने । आसातै । विदथा । वदन् ॥ ७० ॥
आ । रभस्व । जातऽवेदः । तेजस्वत् । हरः । अस्तु । ते ।
शरीरम् । अस्य । सम् । दह । अथ । एनम् । धेहि । सुकृताम् । ऊं इति । लोके ॥७१॥
ये । ते । पूर्वे । पराऽगताः । अपरे । पितरः । च । ये ।
तेभ्यः । घृतस्य । कुल्या । एतु । शतऽधारा । विऽउन्दती ॥ ७२ ॥
एतत् । आ । रोह । वयः । उत्ऽमृजानः । स्वाः । इह । बृहत् । ऊं इति । दीदयन्ते ।
अभि । प्र । इहि । मध्यतः । मा । अप । हास्थाः । पितृणाम् । लोकम् । प्रथमः । यः । अत्र ॥

XVIII.3.68 What vessels covered with cakes the gods maintained for thee, be they for thee rich in svadhā, rich in honey, dripping with ghee.

XVIII.3.69 What grains I scatter along for thee, mixed with sesame, rich in svadhā, be they for thee abundant, prevailing; them let king Yama approve for thee.

XVIII.3.70 Give back, O forest tree, him who is deposited here with thee, that in Yama's seat he may sit speaking counsels.

XVIII.3.71 Take hold, O Jātavedas; let thy seizure be with sharpness; his body do thou consume; then set him in the world of the well-doing.

XVIII.3.72 What Fathers of thine went away earlier and what later, for them let there go a brook of ghee, hundred-streamed, overflowing.

XVIII.3.73 Ascend thou this, gaining vigor; thine own (people) shine here greatly; go forth, unto (them) – be not left behind midway – unto the world of the Fathers that is first there.

(४) चतुर्थं सूक्तम्

(१-८९) एकोननवत्यृचस्यास्य सूक्तस्याथर्वा ऋषिः। (१-८०) प्रथमाद्यशीत्यृचां यमो मन्त्रोक्ताश्च, (८१-८७) एकाशीतितमादिसप्तानां पितरः, (८८) अष्टाशीतितमाया अग्निः, (८९) एकोननवतितमायाश्च चन्द्रमा देवताः। (१, ४, ७, १४, १६, ६०) प्रथमाचतुर्थीसप्तमीचतुर्दशीषोडशीषष्टीनां भुरिक्त्रिष्टुप्, (२, ५, ११, २९, ५०-५१, ५८) द्वितीयापञ्चम्येकादश्येकोनत्रिंशीपञ्चाशदेकपञ्चाशदष्टपञ्चाशीनां जगती, (३) तृतीयायाः पञ्चपदा भुरिगतिजगती, (६) षष्ठ्याः पञ्चपदा शाक्वरी, (८) अष्टम्याः पञ्चपदातिशाक्वरी, (९) नवम्याः पञ्चपदा भुरिक्शाक्वरी, (१०, १५, २८, ३०, ३४-३५, ३७, ४०, ४४-४८, ५२, ५४, ६४-६५, ६९-७०) दशमीपञ्चदश्यष्टाविंशीत्रिंशीचतुस्त्रिंशीपञ्चत्रिंशीसप्तत्रिंशीचत्वारिंशीनां चतुश्चत्वारिंश्यादिपञ्चानां द्विपञ्चाशीचतुष्पञ्चाशीचतुःषष्टीपञ्चषष्ट्येकोनसप्ततितमासप्ततितमानाञ्च त्रिष्टुप्, (१२) द्वादश्या महाबृहती, (१३) त्रयोदश्यास्त्र्यवसाना पञ्चपदा शाक्वरी, (१६-२४) षोडश्यादिनवानां त्रिपदा भुरिङ्महाबृहती, (२५, ३१-३२, ३८, ४१-४२, ५५, ५७, ५९, ६१) पञ्चविंश्येकत्रिंशीद्वात्रिंश्यष्टात्रिंश्येकचत्वारिंशीद्विचत्वारिंशीपञ्चपञ्चाशीसप्तपञ्चाश्येकोनषष्ट्येकषष्टीनामनुष्टुप्, (२६, ४३) षड्विंशीत्रिचत्वारिंश्योर्विराडुपरिष्टाद्बृहती, (२७) सप्तविंश्या याजुषी गायत्री, (३३) त्रयस्त्रिंश्या उपरिष्टाद्बृहती, (३९) एकोनचत्वारिंश्याः पुरोविराडास्तारपङ्क्तिः, (४९) एकोनपञ्चाश्या अनुष्टुब्गर्भा त्रिष्टुप्, (५३) त्रिपञ्चाश्याः पुरोविराट् सतःपङ्क्तिः, (५६) षट्पञ्चाश्याः ककुम्मत्यनुष्टुप्, (६२) द्विषष्ट्या भुरिगास्तारपङ्क्तिः, (६३) त्रिषष्ट्याः स्वराडास्तारपङ्क्तिः, (६६) षट्षष्ट्यास्त्रिपदा स्वराड्गायत्री, (६७) सप्तषष्ट्या द्विपदार्च्यनुष्टुप्, (६८, ७१) अष्टषष्ट्येकसप्ततितमयोरासुर्यनुष्टुप्, (७२-७४, ७९) द्विसप्ततितमादित्र्यस्यैकोनाशीतितमायाश्चासुरी पङ्क्तिः, (७५) पञ्चसप्ततितमाया आसुरी गायत्री, (७६) षट्सप्ततितमाया आसुर्युष्णिक्, (७७) सप्तसप्ततितमाया दैवी जगती, (७८) अष्टसप्ततितमाया आसुरी त्रिष्टुप्, (८०) अशीतितमाया आसुरी जगती, (८१) एकाशीतितमायाः प्राजापत्यानुष्टुप्, (८२) द्व्यशीतितमायाः साम्नी बृहती, (८३-८४) त्र्यशीतितमाचतुरशीतितमयोः साम्नी त्रिष्टुप्, (८५) पञ्चाशीतितमाया आसुरी बृहती, (८६) षडशीतितमायाश्चतुष्पदा ककुम्मत्युष्णिक् [(६७-६८, ७१-८६) सप्तषष्ट्यष्टषष्ट्येकसप्ततितमादिषोडश चैकावसानाः], (८७) सप्ताशीतितमायाश्चतुष्पदा शङ्कुमत्युष्णिक्, (८८) अष्टाशीतितमायास्त्र्यवसाना पथ्यापङ्क्तिः, (८९) एकोननवतितमायाश्च पञ्चपदा पथ्यापङ्क्तिश्छन्दांसि ॥

आ रोहत जनित्रीं जातवेदसः पितृयाणैः सं व आ रोहयामि ।
अवाड्ढव्येषितो हव्यवाह ईजानं युक्ताः सुकृतां धत्त लोके ॥१॥
देवा यज्ञमृतवः कल्पयन्ति हविः पुरोडाशं स्रुचो यज्ञायुधानि ।
तेभिर्याहि पथिभिर्देवयानैर्यैरीजानाः स्वर्गं यन्ति लोकम् ॥२॥

आ । रोहत । जनित्रीम् । जातऽवेदसः । पितृऽयानैः । सम् । वः । आ । रोहयामि ।
अवाट् । हव्या । इषितः । हव्यऽवाहः । ईजानम् । युक्ताः । सुऽकृताम् । धत्त । लोके ॥१॥
देवाः । यज्ञम् । ऋतवः । कल्पयन्ति । हविः । पुरोडाशम् । स्रुचः । यज्ञऽआयुधानि ।
तेभिः । याहि । पथिऽभिः । देवऽयानैः । यैः । ईजानाः । स्वःऽगम् । यन्ति । लोकम् ॥

Yama

XVIII.4.1 Ascend to (your) generatrix, ye Jātavedases; by (roads) that the Fathers travel I make you ascend together; the offering-carrier, sent out, hath carried the offering; united set ye him who hath sacrificed in the world of the well-doing.

XVIII.4.2 The gods, the seasons, arrange the sacrifice, the oblation, the sacrificial cake, the ladles, the implements of sacrifice; with them go thou by roads that the gods travel, by which they that have sacrificed go to the heavenly world.

ऋतस्य पन्थामनु पश्य साध्वङ्गिरसः सुकृतो येन यन्ति ।
तेभिर्याहि पथिभिः स्वर्गं यत्रादित्या मधु भक्षयन्ति तृतीये नाके अधि वि श्रयस्व ॥३॥

त्रयः सुपर्णा उपरस्य मायू नाकस्य पृष्ठे अधि विष्टपि श्रिताः ।
स्वर्गा लोका अमृतेन विष्ठा इषमूर्जं यजमानाय दुह्राम् ॥४॥

जुहूर्दाधार द्यामुपभृदन्तरिक्षं ध्रुवा दाधार पृथिवीं प्रतिष्ठाम् ।
प्रतीमां लोका घृतपृष्ठाः स्वर्गाः कामंकामं यजमानाय दुह्राम् ॥५॥

ध्रुव आ रोह पृथिवीं विश्वभोजसमन्तरिक्षमुपभृदा क्रमस्व ।
जुहु द्यां गच्छ यजमानेन साकं स्रुवेण वत्सेन दिशः प्रपीनाः सर्वा धुक्ष्वाहृणीयमानः ॥६॥

तीर्थैस्तरन्ति प्रवतो महीरिति यज्ञकृतः सुकृतो येन यन्ति ।
अत्रादधुर्यजमानाय लोकं दिशो भूतानि यदकल्पयन्त ॥७॥

अङ्गिरसामयनं पूर्वो अग्निरादित्यानामयनं गार्हपत्यो दक्षिणानामयनं दक्षिणाग्निः ।
महिमानमग्नेर्विहितस्य ब्रह्मणा समङ्गः सर्व उप याहि शग्मः ॥८॥

ऋतस्य । पन्थाम् । अनु । पश्य । साधु । अङ्गिरसः । सुऽकृतः । येन । यन्ति । तेभिः । याहि । पथिऽभिः । स्वःऽगम् । यत्र । आदित्याः । मधु । भक्षयन्ति । तृतीये । नाके । अधि । वि । श्रयस्व ॥ ३ ॥

त्रयः । सुऽपर्णाः । उपरस्य । मायू इति । नाकस्य । पृष्ठे । अधि । विष्टपि । श्रिताः । स्वःऽगाः । लोकाः । अमृतेन । विऽस्थाः । इषम् । ऊर्जम् । यजमानाय । दुह्राम् ॥ ४ ॥

जुहूः । दाधार । द्याम् । उपऽभृत् । अन्तरिक्षम् । ध्रुवा । दाधार । पृथिवीम् । प्रतिऽस्थाम् । प्रति । इमाम् । लोकाः । घृतऽपृष्ठाः । स्वःऽगाः । कामम्ऽकामम् । यजमानाय । दुह्राम् ॥५॥

ध्रुवे । आ । रोह । पृथिवीम् । विश्वऽभोजसम् । अन्तरिक्षम् । उपऽभृत् । आ । क्रमस्व । जुहु । द्याम् । गच्छ । यजमानेन । साकम् । स्रुवेण । वत्सेन । दिशः । प्रऽपीनाः । सर्वाः । धुक्ष्व । अहृणीयमानः ॥ ६ ॥

तीर्थैः । तरन्ति । प्रऽवतः । महीः । इति । यज्ञऽकृतः । सुऽकृतः । येन । यन्ति । अत्र । अदधुः । यजमानाय । लोकम् । दिशः । भूतानि । यत् । अकल्पयन्त ॥ ७ ॥

अङ्गिरसाम् । अयनम् । पूर्वः । अग्निः । आदित्यानाम् । अयनम् । गार्हऽपत्यः । दक्षिणानाम् । अयनम् । दक्षिणऽअग्निः । महिमानम् । अग्नेः । विऽहितस्य । ब्रह्मणा । सम्ऽअङ्गः । सर्वः । उप । याहि । शग्मः ॥ ८ ॥

XVIII.4.3 Look thou happily along the road of righteousness, by which go the Aṅgirases, well-doers; by those roads go thou to heaven, where the Ādityas feed on honey; spread thou out upon the third firmament.

XVIII.4.4 Three eagles, upon the back of the firmament, at the summit are set; let the heavenly worlds, filled with amṛta yield food, refreshment to the sacrificer.

XVIII.4.5 The sacrificial spoon sustains the sky, the offering spoon the atmosphere; the ladle sustains the earth, the support; unto me let the worlds ghee-backed, heavenly, yield every desire for the sacrificer.

XVIII.4.6 O ladle, ascend the all-nourishing earth; stride, O offering spoon, unto the atmosphere; O sacrificial spoon, go to the sky in company with the sacrificer; with the little spoon (as) calf, milk thou all the teeming, unirritated quarters.

XVIII.4.7 By fords they cross the advances called the great ones, by what (road) the sacrifice-makers, the well-doers, go; there did they set a world for the sacrificer; when they arranged the quarters, the creatures.

XVIII.4.8 The track of the Aṅgirases is the eastern fire; the Ādityas track is the householder's fire; the track of the sacrificial gifts is the southern fire; do thou, with thy limbs, whole powerful, go unto the greatness of Agni (as)disposed by brahman.

पूर्वो अग्निष्ट्वा तपतु शं पुरस्ताच्छं पश्चात्तपतु गार्हपत्यः ।
दक्षिणाग्निष्टे तपतु शर्म वर्मोत्तरतो मध्यतो अन्तरिक्षाद्दिशोदिशो अग्ने परि पाहि घोरात् ॥९॥

यूयमग्ने शंतमाभिस्तनूभिरीजानमभि लोकं स्वर्गम् ।
अश्वा भूत्वा पृष्टिवाहो वहाथ यत्र देवैः सधमादं मदन्ति ॥१०॥(२०)

शमग्ने पश्चात्तप शं पुरस्ताच्छमुत्तराच्छमधरात्तपैनम् ।
एकस्त्रेधा विहितो जातवेदः सम्यगेनं धेहि सुकृतामु लोके ॥११॥

शमग्नयः समिद्धा आ रभन्तां प्राजापत्यं मेध्यं जातवेदसः ।
शृतं कृण्वन्त इह माव चिक्षिपन् ॥१२॥

यज्ञ एति विततः कल्पमान ईजानमभि लोकं स्वर्गम् ।
तमग्नयः सर्वहुतं जुषन्तां प्राजापत्यं मेध्यं जातवेदसः ।
शृतं कृण्वन्त इह माव चिक्षिपन् ॥१३॥

ईजानश्चितमारुक्षदग्निं नाकस्य पृष्ठाद्दिवमुत्पतिष्यन् ।
तस्मै प्र भाति नभसो ज्योतिषीमान्त्स्वर्गः पन्थाः सुकृते देवयानः ॥१४॥

पूर्वः । अग्निः । त्वा । तपतु । शम् । पुरस्तात् । शम् । पश्चात् । तपतु । गार्हऽपत्यः ।
दक्षिणऽअग्निः । ते । तपतु । शर्म । वर्म । उत्तरतः । मध्यतः । अन्तरिक्षात् । दिशःऽदिशः ।
अग्ने । परि । पाहि । घोरात् ॥ ९ ॥

यूयम् । अग्ने । शम्ऽतमाभिः । तनूभिः । ईजानम् । अभि । लोकम् । स्वःऽगम् ।
अश्वाः । भूत्वा । पृष्टिऽवाहः । वहाथ । यत्र । देवैः । सधऽमादम् । मदन्ति ॥ १० ॥

शम् । अग्ने । पश्चात् । तप । शम् । पुरस्तात् । शम् । उत्तरात् । शम् । अधरात् । तप । एनम् ।
एकः । त्रेधा । विऽहितः । जातऽवेदः । सम्यक् । एनम् । धेहि । सुऽकृताम् । ऊं इति । लोके ॥ ११ ॥

शम् । अग्नयः । सम्ऽइद्धाः । आ । रभन्ताम् । प्राजाऽपत्यम् । मेध्यम् । जातऽवेदसः ।
शृतम् । कृण्वन्तः । इह । मा । अव । चिक्षिपन् ॥ १२ ॥

यज्ञः । एति । विऽततः । कल्पमानः । ईजानम् । अभि । लोकम् । स्वःऽगम् ।
तम् । अग्नयः । सर्वऽहुतम् । जुषन्ताम् । प्राजाऽपत्यम् । मेध्यम् । जातऽवेदसः । शृतम् ।
कृण्वन्तः । इह । मा । अव । चिक्षिपन् ॥ १३ ॥

ईजानः । चितम् । आ । अरुक्षत् । अग्निम् । नाकस्य । पृष्ठात् । दिवम् । उत्ऽपतिष्यन् । तस्मै ।
प्र । भाति । नभसः । ज्योतिषीऽमान् । स्वःऽगः । पन्थाः । सुऽकृते । देवऽयानः ॥ १४ ॥

XVIII.4.9 Let the eastern fire burn thee happily in front; let the householder's fire burn happily behind; let the southern fire burn refuge, defense for thee; from the north, from the midst, from the atmosphere, from each quarter, O Agni, protect him round about from what is terrible.

XVIII.4.10 Ye, O Agni, having become back-carrying horses, shall with most healthful forms carry him that has sacrificed unto the heavenly world, where they revel in common revelry with the gods.

XVIII.4.11 Burn, O Agni, happily behind, happily in front; burn him happily above, happily below; being one, O Jātavedas, triply disposed, set him collectedly in the world of the well-doers.

XVIII.4.12 Let the fires, kindled, take hold happily; let the Jātavedases, making done here him that is Prajāpati's (and) sacrificial, not throw him down.

XVIII.4.13 The sacrifice goes, extended, adapting itself him who hath sacrificed, unto the heavenly world; let the fires enjoy it, made a whole oblation; let the Jātavedases, making done here him that is Prajāpati's (and) sacrificial, not throw him down.

XVIII.4.14 He that hath sacrificed hath ascended the piled fire, about to fly up to heaven from the back of the firmament; for him, the well-doer, shines forth from the welkin, full of light, the heavenly road, travelled by the gods.

अग्निर्होताध्वर्युष्टे बृहस्पतिरिन्द्रो ब्रह्मा दक्षिणतस्ते अस्तु ।
हुतोयं संस्थितो यज्ञ एति यत्र पूर्वमयनं हुतानाम् ॥१५॥
अपूपवान्क्षीरवांश्चरुरेह सीदतु ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥१६॥
अपूपवान्दधिवांश्चरुरेह सीदतु ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥१७॥
अपूपवान्द्रप्सवांश्चरुरेह सीदतु ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥१८॥
अपूपवान्घृतवांश्चरुरेह सीदतु ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥१९॥
अपूपवान्मांसवांश्चरुरेह सीदतु ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥२०॥ (२४)

अग्निः । होता । अध्वर्युः । ते । बृहस्पतिः । इन्द्रः । ब्रह्मा । दक्षिणतः । ते । अस्तु ।
हुतः । अयम् । सम्ऽस्थितः । यज्ञः । एति । यत्र । पूर्वम् । अयनम् । हुतानाम् ॥१५॥

अपूपऽवान् । क्षीरऽवान् । चरुः । आ । इह । सीदतु ।
लोकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह । स्थ ॥ १६ ॥

अपूपऽवान् । दधिऽवान् । चरुः । आ । इह । सीदतु ।
लोकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह । स्थ ॥ १७ ॥

अपूपऽवान् । द्रप्सऽवान् । चरुः । आ । इह । सीदतु ।
लोकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह । स्थ ॥ १८ ॥

अपूपऽवान् । घृतऽवान् । चरुः । आ । इह । सीदतु ।
लोकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह । स्थ ॥ १९ ॥

अपूपऽवान् । मांसऽवान् । चरुः । आ । इह । सीदतु ।
लोकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह । स्थ ॥ २० ॥

XVIII.4.15 Agni thine invoker, Brhaspati thine officiating priest, be Indra on the right thy supervising priest; this offered sacrifice, being completed, goeth where is the ancient track of those offered.

XVIII.4.16 Rich in cakes, rich in milk let the dish take seat here; to the world-makers, the road-makers, do we sacrifice, whoever of you are here, sharing in the oblation of the gods.

XVIII.4.17 Rich in cakes, rich in curds, let the dish etc. etc.

XVIII.4.18 Rich in cakes, rich in drops, let the dish etc. etc.

XVIII.4.19 Rich in cakes, rich in ghee, let the dish etc. etc.

XVIII.4.20 Rich in cakes, rich in flesh, let the dish etc. etc.

अपूपवानन्नवांश्चरुरेह सीदतु ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥२१॥
अपूपवान्मधुमांश्चरुरेह सीदतु ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥२२॥
अपूपवान्रसवांश्चरुरेह सीदतु ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥२३॥
अपूपवानपवांश्चरुरेह सीदतु ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥२४॥
अपूपापिहितान्कुम्भान्यांस्ते देवा अधारयन् ।
ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुतः ॥२५॥
यास्ते धाना अनुकिरामि तिलमिश्राः स्वधावतीः ।
तास्ते सन्तूद्भ्वीः प्रभ्वीस्तास्ते यमो राजानु मन्यताम् ॥२६॥

अपूपऽवान् । अन्नऽवान् । चरुः । आ । इह । सीदतु ।
लोकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह । स्थ ॥ २१ ॥
अपूपऽवान् । मधुऽमान् । चरुः । आ । इह । सीदतु ।
लोकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह । स्थ ॥ २२ ॥
अपूपऽवान् । रसऽवान् । चरुः । आ । इह । सीदतु ।
लोकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह । स्थ ॥ २३ ॥
अपूपऽवान् । अपऽवान् । चरुः । आ । इह । सीदतु ।
लोकऽकृतः । पथिऽकृतः । यजामहे । ये । देवानाम् । हुतऽभागाः । इह । स्थ ॥ २४ ॥
अपूपऽअपिहितान् । कुम्भान् । यान् । ते । देवाः । अधारयन् ।
ते । ते । सन्तु । स्वधाऽवन्तः । मधुऽमन्तः । घृतऽश्चुतः ॥ २५ ॥
याः । ते । धानाः । अनुऽकिरामि । तिलऽमिश्राः । स्वधाऽवतीः ।
ताः । ते । सन्तु । उत्ऽभ्वीः । प्रऽभ्वीः । ताः । ते । यमः । राजा । अनु । मन्यताम् ॥ २६ ॥

XVIII.4.21 Rich in cakes, rich in food, let the dish etc. etc.

XVIII.4.22 Rich in cakes, rich in honey, let the dish etc. etc.

XVIII.4.23 Rich in cakes, rich in sap, let the dish etc. etc.

XVIII.4.24 Rich in cakes, rich in water, let the dish etc. etc.

XVIII.4.25 What vessels covered with cakes the gods maintained for thee, be they for thee rich in svadhā, rich in honey, dripping with ghee.

XVIII.4.26 What grains I scatter along for thee, mixed with same, rich in svadhā, be they for thee uprising, prevailing; them let king Yama approve for thee.

अक्षितिं भूयसीम् ॥२७॥
द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः ।
समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥२८॥
शतधारं वायुमर्कं स्वर्विदं नृचक्षसस्ते अभि चक्षते रयिम् ।
ये पृणन्ति प्र च यच्छन्ति सर्वदा ते दुह्रते दक्षिणां सप्तमातरम् ॥२९॥
कोशं दुहन्ति कलशं चतुर्बिलमिडां धेनुं मधुमतीं स्वस्तये ।
ऊर्जं मदन्तीमदितिं जनेष्वग्ने मा हिंसीः परमे व्योमन् ॥३०॥ (४)

एतत्ते देवः सविता वासो ददाति भर्तवे ।
तत्त्वं यमस्य राज्ये वसानस्तार्प्यं चर ॥३१॥
धाना धेनुरभवद्वत्सो अस्यास्तिलोऽभवत् ।
तां वै यमस्य राज्ये अक्षितामुप जीवति ॥३२॥

अक्षितिम् । भूयसीम् ॥ २७ ॥

द्रप्सः । चस्कन्द । पृथिवीम् । अनु । द्याम् । इमम् । च । योनिम् । अनु । यः । च । पूर्वः ।
समानम् । योनिम् । अनु । सम्ऽचरन्तम् । द्रप्सम् । जुहोमि । अनु । सप्त । होत्राः ॥ २८ ॥

शतऽधारम् । वायुम् । अर्कम् । स्वःऽविदम् । नृऽचक्षसः । ते । अभि । चक्षते । रयिम् ।
ये । पृणन्ति । प्र । च । यच्छन्ति । सर्वदा । ते । दुह्रते । दक्षिणाम् । सप्तऽमातरम् ॥ २९ ॥
कोशम् । दुहन्ति । कलशम् । चतुःऽबिलम् । इडाम् । धेनुम् । मधुऽमतीम् । स्वस्तये ।
ऊर्जम् । मदन्तीम् । अदितिम् । जनेषु । अग्ने । मा । हिंसीः । परमे । विऽओमन् ॥ ३० ॥

एतत् । ते । देवः । सविता । वासः । ददाति । भर्तवे ।
तत् । त्वम् । यमस्य । राज्ये । वसानः । तार्प्यम् । चर ॥ ३१ ॥
धानाः । धेनुः । अभवत् । वत्सः । अस्याः । तिलः । अभवत् ।
ताम् । वै । यमस्य । राज्ये । अक्षिताम् । उप । जीवति ॥ ३२ ॥

XVIII.4.27 A more abundant inexhaustibleness.

XVIII.4.28 The drop leaped toward the earth, the sky, toward both this lair and the one that was of old; of the drop that goes about toward the same lair do I make oblation, after seven invocations.

XVIII.4.29 A hundred-streamed Vāyu, a heaven finding sun wealth, do those men-beholders look upon; who so bestow and present always, they milk a sacrificial gift having seven mothers.

XVIII.4.30 They milk a receptacle, a jar with four orifices, idā (as) milch-cow rich in honey, in order to well-being; reveling refreshment Aditi among the people, injure thou not, O Agni, in the highest firmament.

XVIII.4.31 The grains became a milch-cow; the sesame became her calf; upon her, unexhausted, one lives in Yama's realm.

XVIII.4.32 This garment god Savitar gives thee to wear; putting on that which is tārpya, do thou go about in Yama's realm.

एतास्ते असौ धेनवः कामदुघा भवन्तु ।
एनीः श्येनीः सरूपा विरूपास्तिलवत्सा उप तिष्ठन्तु त्वात्र ॥३३॥
एनीर्धाना हरिणीः श्येनीरस्य कृष्णा धाना रोहिणीर्धेनवस्ते ।
तिलवत्सा ऊर्जमस्मै दुहाना विश्वाहा सन्त्वनपस्फुरन्तीः ॥३४॥
वैश्वानरे हविरिदं जुहोमि साहस्रं शतधारमुत्सम् ।
स बिभर्ति पितरं पितामहान्प्रपितामहान्बिभर्ति पिन्वमानः ॥३५॥
सहस्रधारं शतधारमुत्समक्षितं व्यच्यमानं सलिलस्य पृष्ठे ।
ऊर्जं दुहानमनपस्फुरन्तमुपासते पितरः स्वधाभिः ॥३६॥
इदं कसाम्बु चयनेन चितं तत्सजाता अव पश्यतेत ।
मर्त्योयममृतत्वमेति तस्मै गृहान्कृणुत यावत्सबन्धु ॥३७॥
इहैवैधि धनसनिरिहचित्त इहक्रतुः । इहैधि वीर्यवत्तरो वयोधा अपराहतः ॥३८॥

एताः । ते । असौ । धेनवः । कामऽदुघाः । भवन्तु ।
एनीः । श्येनीः । सऽरूपाः । विऽरूपाः । तिलऽवत्साः । उप । तिष्ठन्तु । त्वा । अत्र ॥
एनीः । धानाः । हरिणीः । श्येनीः । अस्य । कृष्णाः । धानाः । रोहिणीः । धेनवः । ते ।
तिलऽवत्साः । ऊर्जम् । अस्मै । दुहानाः । विश्वाहा । सन्तु । अनपऽस्फुरन्तीः ॥३४॥
वैश्वानरे । हविः । इदम् । जुहोमि । साहस्रम् । शतऽधारम् । उत्सम् ।
सः । बिभर्ति । पितरम् । पितामहान् । प्रऽपितामहान् । बिभर्ति । पिन्वमानः ॥ ३५ ॥
सहस्रऽधारम् । शतऽधारम् । उत्सम् । अक्षितम् । विऽअच्यमानम् । सलिलस्य । पृष्ठे ।
ऊर्जम् । दुहानम् । अनपऽस्फुरन्तम् । उप । आसते । पितरः । स्वधाभिः ॥ ३६ ॥
इदम् । कसाम्बु । चयनेन । चितम् । तत् । सऽजाताः । अव । पश्यत । आ । इत ।
मर्त्यः । अयम् । अमृतऽत्वम् । एति । तस्मै । गृहान् । कृणुत । यावत्ऽसबन्धु ॥ ३७ ॥
इह । एव । एधि । धनऽसनिः । इहऽचित्तः । इहऽक्रतुः ।
इह । एधि । वीर्यवत्ऽतरः । वयःऽधाः । अपराऽहतः ॥ ३८ ॥

XVIII.4.33 Be these, O so-and-so, thy milch-kine that yield what is desired; variegated, white, of like form, of different form, with sesame as calf, let them wait upon thee there.

XVIII.4.34 Grains variegated, yellow, white, grains black, red, (be) thy much kine here; with sesame as calf, yielding him refreshment, be they ever unresisting.

XVIII.4.35 In Vaiśvānara I offer this oblation, a thousand fold, hundred streamed fountain; it supports (our) father, grandfathers; (our) great-grandfathers it supports, swelling.

XVIII.4.36 A thousand-streamed, hundred-streamed fountain, unexhausted expanded upon the back of the sea, yielding refreshment, unresisting, do the Fathers wait on at their will.

XVIII.4.37 This funeral pile (is) piled with piling; come, ye (his) fellows, look down at it; this mortal goeth to immortality; make ye houses for him according to his kindred.

XVIII.4.38 Be thou just here, winning riches, with thought here, with ability here; be thou here, very heroic, vigor-bestowing, not smitten away.

पुत्रं पौत्रमभितर्पयन्तीरापो मधुमतीरिमाः ।
स्वधां पितृभ्यो अमृतं दुहाना आपो देवीरुभयांस्तर्पयन्तु ॥३९॥
आपो अग्निं प्र हिणुत पितॄँरुपेमं यज्ञं पितरो मे जुषन्ताम् ।
आसीनामूर्जमुप ये सचन्ते ते नो रयिं सर्ववीरं नि यच्छान् ॥४०॥ (२१)

समिन्धते अमर्त्यं हव्यवाहं घृतप्रियम् ।
स वेद निहितान्निधीन्पितॄन्परावतो गतान् ॥४१॥
यं ते मन्थं यमोदनं यन्मांसं निपृणामि ते ।
ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुतः ॥४२॥

यास्ते धाना अनुकिरामि तिलमिश्राः स्वधावतीः ।
तास्ते सन्तूद्भ्वीः प्रभ्वीस्तास्ते यमो राजानु मन्यताम् ॥४३॥
इदं पूर्वमपरं नियानं येना ते पूर्वे पितरः परेताः ।
पुरोगवा ये अभिशाचो अस्य ते त्वा वहन्ति सुकृतामु लोकम् ॥४४॥

पुत्रम् । पौत्रम् । अभिऽतर्पयन्तीः । आपः । मधुऽमतीः । इमाः ।
स्वधाम् । पितृऽभ्यः । अमृतम् । दुहानाः । आपः । देवीः । उभयान् । तर्पयन्तु ॥३९॥
आपः । अग्निम् । प्र । हिणुत । पितॄन् । उप । इमम् । यज्ञम् । पितरः । मे । जुषन्ताम् ।
आसीनाम् । ऊर्जम् । उप । ये । सचन्ते । ते । नः । रयिम् । सर्वऽवीरम् । नि । यच्छान् ॥ ४० ॥

सम् । इन्धते । अमर्त्यम् । हव्यऽवाहम् । घृतऽप्रियम् ।
सः । वेद । निऽहितान् । निऽधीन् । पितॄन् । पराऽवतः । गतान् ॥ ४१ ॥
यम् । ते । मन्थम् । यम् । ओदनम् । यत् । मांसम् । निऽपृणामि । ते ।
ते । ते । सन्तु । स्वधाऽवन्तः । मधुऽमन्तः । घृतऽश्चुतः ॥ ४२ ॥

याः । ते । धानाः । अनुऽकिरामि । तिलऽमिश्राः । स्वधाऽवतीः । ताः । ते । सन्तु ।
उत्ऽभ्वीः । प्रऽभ्वीः । ताः । ते । यमः । राजा । अनु । मन्यताम् ॥ ४३ ॥
इदम् । पूर्वम् । अपरम् । निऽयानम् । येन । ते । पूर्वे । पितरः । पराऽइताः ।
पुरःऽगवाः । ये । अभिऽसाचः । अस्य । ते । त्वा । वहन्ति । सुकृताम् । ऊं इति । लोकम् ॥

XVIII.4.39 These waters, rich in honey, satisfying son (and) grandson, yielding to the Fathers svadhā (and) amṛta—let the heavenly waters gratify both sides.

XVIII.4.40 O waters, send forth Agni unto the Fathers this sacrifice of mine let the Fathers enjoy; they who attach themselves unto a sitting refreshment, may they confirm to us wealth having all heroes.

XVIII.4.41 They kindle the immortal one, oblation-carrying, ghee-loving; he knoweth the deposited deposits, the Fathers that are gone away to the distances.

XVIII.4.42 What stir about for thee, what rice-dish, what flesh I offer to thee, be they for thee rich in svadhā, rich in honey, dripping with ghee.

XVIII.4.43 What grains I scatter along for thee, mixed with sesame, rich in svadhā, be they for thee abundant, prevailing; them let king Yama approve for thee.

XVIII.4.44 This (is) the former, the after down-track, by which thy former Fathers went away; they who are the forerunners, the followers of it, they carry thee to the world of the well-doing.

सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने ।
सरस्वतीं सुकृतो हवन्ते सरस्वती दाशुषे वार्यं दात् ॥४५॥
सरस्वतीं पितरो हवन्ते दक्षिणा यज्ञमभिनक्षमाणाः ।
आसद्यास्मिन्बर्हिषि मादयध्वमनमीवा इष आ धेह्यस्मे ॥४६॥
सरस्वति या सरथं ययाथोक्थैः स्वधाभिर्देवि पितृभिर्मदन्ती ।
सहस्रार्घमिडो अत्र भागं रायस्पोषं यजमानाय धेहि ॥४७॥
पृथिवीं त्वा पृथिव्यामा वेशयामि देवो नो धाता प्र तिरात्यायुः ।
परापरैता वसुविद्वो अस्त्वधा मृताः पितृषु सं भवन्तु ॥४८॥
आ प्र च्यवेथामप तन्मृजेथां यद्वामभिभा अत्रोचुः ।
अस्मादेतमघ्न्यौ तद्वशीयो दातुः पितृष्विहभोजनौ मम ॥४९॥
एयमगन्दक्षिणा भद्रतो नो अनेन दत्ता सुदुघा वयोधाः ।
यौवने जीवानुपपृञ्चती जरा पितृभ्य उपसंपराणयादिमान् ॥५०॥ (२७)

सरस्वतीम् । देवऽयन्तः । हवन्ते । सरस्वतीम् । अध्वरे । तायमाने ।
सरस्वतीम् । सुऽकृतः । हवन्ते । सरस्वती । दाशुषे । वार्यम् । दात् ॥ ४५ ॥
सरस्वतीम् । पितरः । हवन्ते । दक्षिणा । यज्ञम् । अभिऽनक्षमाणाः ।
आऽसद्य । अस्मिन् । बर्हिषि । मादयध्वम् । अनमीवाः । इषः । आ । धेहि । अस्मे इति ॥
सरस्वति । या । सऽरथम् । ययाथ । उक्थैः । स्वधाभिः । देवि । पितृऽभिः । मदन्ती ।
सहस्रऽअर्घम् । इडः । अत्र । भागम् । रायः । पोषम् । यजमानाय । धेहि ॥ ४७ ॥
पृथिवीम् । त्वा । पृथिव्याम् । आ । वेशयामि । देवः । नः । धाता । प्र । तिराति । आयुः ।
पराऽपरैता । वसुऽवित् । वः । अस्तु । अध । मृताः । पितृषु । सम् । भवन्तु ॥ ४८ ॥
आ । प्र । च्यवेथाम् । अप । तत् । मृजेथाम् । यत् । वाम् । अभिऽभाः । अत्र । ऊचुः ।
अस्मात् । आ । इतम् । अघ्न्यौ । तत् । वशीयः । दातुः । पितृषु । इहऽभोजनौ । मम ॥
आ । इयम् । अगन् । दक्षिणा । भद्रतः । नः । अनेन । दत्ता । सुऽदुघा । वयःऽधाः ।
यौवने । जीवान् । उपऽपृञ्चती । जरा । पितृऽभ्यः । उपऽसंपराणयात् । इमान् ॥५० ॥

Sarasvatī

XVIII.4.45 On Sarasvatī do the pious call; on Sarasvatī, while the sacrifice is being extended; on Sarasvatī do the well-doers call; may Sarasvatī give what is desirable to the worshiper.

XVIII.4.46 On Sarasvatī do the Fathers call, arriving at the sacrifice on the south; sitting on this barhis, do ye revel; assign thou to us food free from disease.

XVIII.4.47 O Sarasvatī, that wentest in company with the songs, with the svadhās, O goddess, revelling with the Fathers, assign thou to the sacrificer here a portion of refreshment of thousand-fold value, abundance of wealth.

XVIII.4.48 Thee, being earth, I make enter into earth; may god Dhātar lengthen out our life-time; let him that goeth very far away be a finder of good for you; then may the dead come to be among the Fathers.

XVIII.4.49 Start ye forward hither, wipe off that which the portents have said there of you; from that come ye, inviolable ones, to this which is better, being bestowers here on me, a giver to the Fathers.

XVIII.4.50 This sacrificial gift hath come excellently to us, given by him, well-milking, vigor-bestowing; old age, coming close to them living in youth, shall lead these away together unto the Fathers.

इदं पितृभ्यः प्र भरामि बर्हिर्जीवं देवेभ्य उत्तरं स्तृणामि ।
तदा रोह पुरुष मेध्यो भवन्प्रति त्वा जानन्तु पितरः परेतम् ॥५१॥
एदं बर्हिरसदो मेध्योऽभूः प्रति त्वा जानन्तु पितरः परेतम् ।
यथापरु तन्वं सं भरस्व गात्राणि ते ब्रह्मणा कल्पयामि ॥५२॥
पर्णो राजापिधानं चरूणामूर्जो बलं सह ओजो न आगन् ।
आयुर्जीवेभ्यो विदधद्दीर्घायुत्वाय शतशारदाय ॥५३॥
ऊर्जो भागो य इमं जजानाश्मान्नानामाधिपत्यं जगाम ।
तमर्चत विश्वमित्रा हविर्भिः स नो यमः प्रतरं जीवसे धात् ॥५४॥
यथा यमाय हर्म्यमवपन्पञ्च मानवाः ।
एवा वपामि हर्म्यं यथा मे भूरयोऽसत ॥५५॥
इदं हिरण्यं बिभृहि यत्ते पिताबिभः पुरा ।
स्वर्गं यतः पितुर्हस्तं निर्मृड्ढि दक्षिणम् ॥५६॥

इदम् । पितृऽभ्यः । प्र । भरामि । बर्हिः । जीवम् । देवेभ्यः । उत्ऽतरम् । स्तृणामि ।
तत् । आ । रोह । पुरुष । मेध्यः । भवन् । प्रति । त्वा । जानन्तु । पितरः । पराऽइतम् ॥
आ । इदम् । बर्हिः । असदः । मेध्यः । अभूः । प्रति । त्वा । जानन्तु । पितरः । पराऽइतम् ।
यथाऽपरु । तन्वम् । सम् । भरस्व । गात्राणि । ते । ब्रह्मणा । कल्पयामि ॥ ५२ ॥
पर्णः । राजा । अपिऽधानम् । चरूणाम् । ऊर्जः । बलम् । सहः । ओजः । नः । आ ।
अगन् । आयुः । जीवेभ्यः । विऽदधत् । दीर्घायुऽत्वाय । शतऽशारदाय ॥ ५३ ॥
ऊर्जः । भागः । यः । इमम् । जजान । अश्मा । अन्नानाम् । आधिऽपत्यम् । जगाम ।
तम् । अर्चत । विश्वऽमित्राः । हविःऽभिः । सः । नः । यमः । प्रऽतरम् । जीवसे । धात् ॥५४॥
यथा । यमाय । हर्म्यम् । अवपन् । पञ्च । मानवाः ।
एव । वपामि । हर्म्यम् । यथा । मे । भूरयः । असत ॥ ५५ ॥
इदम् । हिरण्यम् । बिभृहि । यत् । ते । पिता । अबिभः । पुरा ।
स्वःऽगम् । यतः । पितुः । हस्तम् । निः । मृड्ढि । दक्षिणम् ॥ ५६ ॥

XVIII.4.51 This barhis I bring forward for the Fathers; a living, higher one I strew for the gods; that do thou ascend, O man, becoming sacrificial let the Fathers acknowledge thee who art departed.

XVIII.4.52 Thou hast sat upon this barhis, thou hast become sacrificial; let the Fathers acknowledge thee who art departed; collect thy body according to its joints; I arrange thy members with brahman.

XVIII.4.53 King leaf is the cover of the dishes; the strength of refreshment, the power, vigor, hath come to us, dispensing life-time to the living, in order to length of life for a hundred autumns.

XVIII.4.54 The share of refreshment that generated this man; the stone attained the overlordship of the foods – him praise ye, all befriended with oblations; may that yama make us to live further.

XVIII.4.55 As the five clans scattered a dwelling for Yama, so do I scatter a dwelling, that there may be many of me.

XVIII.4.56 Wear thou this gold, which thy father wore before; of thy father, going to heaven, do thou wipe off the right hand.

ये च जीवा ये च मृता ये जाता ये च यज्ञियाः ।
तेभ्यो घृतस्य कुल्यैतु मधुधारा व्युन्दती ॥५७॥
वृषा मतीनां पवते विचक्षणः सूरो अह्नां प्रतरीतोषसां दिवः ।
प्राणः सिन्धूनां कलशाँ अचिक्रददिन्द्रस्य हार्दिमाविशन्मनीषया ॥५८॥
त्वेषस्ते धूम ऊर्णोतु दिवि षंच्छुक्र आततः ।
सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥५९॥
प्र वा एतीन्दुरिन्द्रस्य निष्कृतिं सखा सख्युर्न प्र मिनाति संगिरः ।
मर्य इव योषाः समर्षसे सोमः कलशे शतयामना पथा ॥६०॥ (३४)
अक्षन्नमीमदन्त ह्यव प्रियाँ अधूषत । अस्तोषत स्वभानवो विप्रा यविष्ठा ईमहे ॥६१॥
आ यात पितरः सोम्यासो गम्भीरैः पथिभिः पितृयाणैः ।
आयुरस्मभ्यं दधतः प्रजां च रायश्च पोषैरभि नः सचध्वम् ॥६२॥

ये । च । जीवाः । ये । च । मृताः । ये । जाताः । ये । च । यज्ञियाः ।
तेभ्यः । घृतस्य । कुल्या । एतु । मधुऽधारा । विऽउन्दती ॥ ५७ ॥
वृषा । मतीनाम् । पवते । विऽचक्षणः । सूरः । अह्नाम् । प्रऽतरीता । उषसाम् । दिवः ।
प्राणः । सिन्धूनाम् । कलशान् । अचिक्रदत् । इन्द्रस्य । हार्दिम् । आऽविशन् । मनीषया ॥
त्वेषः । ते । धूमः । ऊर्णोतु । दिवि । सन् । शुक्रः । आऽततः ।
सूरः । न । हि । द्युता । त्वम् । कृपा । पावक । रोचसे ॥ ५९ ॥
प्र । वै । एति । इन्दुः । इन्द्रस्य । निःऽकृतिम् । सखा । सख्युः । न । प्र । मिनाति । सम्ऽगिरः ।
मर्यःऽइव । योषाः । सम् । अर्षसे । सोमः । कलशे । शतऽयामना । पथा ॥ ६० ॥
अक्षन् । अमीमदन्त । हि । अव । प्रियान् । अधूषत ।
अस्तोषत । स्वऽभानवः । विप्राः । यविष्ठाः । ईमहे ॥ ६१ ॥
आ । यात । पितरः । सोम्यासः । गम्भीरैः । पथिऽभिः । पितृऽयानैः ।
आयुः । अस्मभ्यम् । दधतः । प्रऽजाम् । च । रायः । च । पोषैः । अभि । नः । सचध्वम् ॥६२॥

XVIII.4.57 Both those who are living and those who are dead; those who are born and those who are worshipful – for them let there go a brook of ghee, honey-streamed, overflowing.

XVIII.4.58 There purifies itself the conspicuous bull of the prayers, the sun of days, lengthener out of dawns, of the sky; the breath of the rivers hath made the jars to resound loudly; entering Indra's heart with skill.

XVIII.4.59 Let thy sparkling smoke cover, being in the sky, extended bright; for thou, O purifier, shinest like the sun with luster, with beauty.

XVIII.4.60 Soma verily goes forward to Indra's rendezvous; the comrade does not violate the comrade's agreements; thou rushest to join, as a male after female – soma, in the jar, by a road of a hundred tracks.

XVIII.4.61 They have eaten; they have revelled (surely); they have shaken off those that are dear; having own brightness, they have praised: inspired, youngest, we implore.

XVIII.4.62 Come ye, O Fathers, delectable, by profound roads that the Fathers travel, assigning to us lifetime and progeny; and do ye attach yourselves to us with abundances of wealth.

परा यात पितरः सोम्यासो गम्भीरैः पथिभिः पूर्याणैः ।
अधा मासि पुनरा यात नो गृहान्हविरत्तुं सुप्रजसः सुवीराः ॥६३॥
यद्वो अग्निरजहादेकमङ्गं पितृलोकं गमयं जातवेदाः ।
तद्व एतत्पुनरा प्याययामि साङ्गाः स्वर्गे पितरो मादयध्वम् ॥६४॥
अभूद्दूतः प्रहितो जातवेदाः सायं न्यह्न उपवन्द्यो नृभिः ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि ॥६५॥
असौ हा इह ते मनः ककुत्सलमिव जामयः । अभ्येनं भूम ऊर्णुहि ॥६६॥
शुम्भन्तां लोकाः पितृषदनाः पितृषदने त्वा लोक आ सादयामि ॥६७॥
येऽस्माकं पितरस्तेषां बर्हिरसि ॥६८॥
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अधा वयमादित्य व्रते तवानागसो अदितये स्याम ॥६९॥

परा । यात । पितरः । सोम्यासः । गम्भीरैः । पथिऽभिः । पूःऽयानैः ।
अध । मासि । पुनः । आ । यात । नः । गृहान् । हविः । अत्तुम् । सुऽप्रजसः । सुऽवीराः ॥
यत् । वः । अग्निः । अजहात् । एकम् । अङ्गम् । पितृऽलोकम् । गमयन् । जातऽवेदाः ।
तत् । वः । एतत् । पुनः । आ । प्याययामि । सऽअङ्गाः । स्वःऽगे । पितरः । मादयध्वम् ॥
अभूत् । दूतः । प्रऽहितः । जातऽवेदाः । सायम् । निऽअह्ने । उपऽवन्द्यः । नृऽभिः ।
प्र । अदाः । पितृऽभ्यः । स्वधया । ते । अक्षन् । अद्धि । त्वम् । देव । प्रऽयता । हवींषि ॥
असौ । हे । इह । ते । मनः । ककुत्सलम्ऽइव । जामयः । अभि । एनम् । भूमे । ऊर्णुहि ॥६६॥
शुम्भन्ताम् । लोकाः । पितृऽसदनाः । पितृऽसदने । त्वा । लोके । आ । सादयामि ॥६७॥
ये । अस्माकम् । पितरः । तेषाम् । बर्हिः । असि ॥ ६८ ॥
उत् । उत्ऽतमम् । वरुण । पाशम् । अस्मत् । अव । अधमम् । वि । मध्यमम् । श्रथय ।
अध । वयम् । आदित्य । व्रते । तव । अनागसः । अदितये । स्याम ॥ ६९ ॥

XVIII.4.63 Go away, O Fathers, delectable, by profound roads that go to the stronghold; then, in a month, come ye again to our houses to eat the oblation, with good progeny, with good heroes.

XVIII.4.64 What one limb of you Agni Jātavedas left when making you go to the Father's world, that same for you I fill up again; revel ye, O Fathers, in heaven with (all) your limbs.

XVIII.4.65 Jātavedas has been the messenger sent forth, at evening, at close of day to be honored by men;–thou hast given to the Fathers; they have eaten after their wont; eat thou, O god, the presented oblation.

XVIII.4.66 Thou yonder, ho ! hither thy mind ! as sisters a kakutsala, do thou cover him, O earth.

XVIII.4.67 Let the worlds where the Fathers sit adorn themselves; I make thee to sit in the world where the Fathers sit.

XVIII.4.68 Thou art the barhis of them that are our Fathers.

XVIII.4.69 Loosen up the uppermost fetter from us, O Varuna, down the lowest, off the midmost; then may we in thy sphere, O Āditya, be guiltless unto Aditi.

प्रास्मत्पाशान्वरुण मुञ्च सर्वान्यैः समामे बध्यते यैर्व्यामे ।
अधा जीवेम शरदं शतानि त्वया राजन्गुपिता रक्षमाणाः ॥७०॥ (२५)

अग्नये कव्यवाहनाय स्वधा नमः ॥७१॥
सोमाय पितृमते स्वधा नमः ॥७२॥
पितृभ्यः सोमवद्भ्यः स्वधा नमः ॥७३॥
यमाय पितृमते स्वधा नमः ॥७४॥
एतत्ते प्रततामह स्वधा ये च त्वामनु ॥७५॥
एतत्ते ततामह स्वधा ये च त्वामनु ॥७६॥
एतत्ते तत स्वधा ॥७७॥
स्वधा पितृभ्यः पृथिविषद्भ्यः ॥७८॥

प्र । अस्मत् । पाशान् । वरुण । मुञ्च । सर्वान् । यैः । सम्ऽआमे । बध्यते । यैः । विऽआमे ।
अध । जीवेम । शरदम् । शतानि । त्वया । राजन् । गुपिताः । रक्षमाणाः ॥ ७० ॥

अग्नये । कव्यऽवाहनाय । स्वधा । नमः ॥ ७१ ॥

सोमाय । पितृऽमते । स्वधा । नमः ॥ ७२ ॥

पितृऽभ्यः । सोमवत्ऽभ्यः । स्वधा । नमः ॥ ७३ ॥

यमाय । पितृऽमते । स्वधा । नमः ॥ ७४ ॥

एतत् । ते । प्रऽततामह । स्वधा । ये । च । त्वाम् । अनु ॥ ७५ ॥

एतत् । ते । [illegible]ामह । स्वधा । ये । च । त्वाम् । अनु ॥ ७६ ॥

एतत् । ते । तत । स्वधा ॥ ७७ ॥

स्वधा । पितृऽभ्यः । पृथिविसत्ऽभ्यः ॥ ७८ ॥

XVIII.4.70 Release from us all fetters, O Varuna, with which one is bound crosswise, with which lengthwise; so may we live hundred of autumns by thee, O king, guarded, defended.

XVIII.4.71 To Agni, carrier of the kavyas, (be) svadhā (and) homage.

XVIII.4.72 To Soma with the Fathers (be) svadhā (and) homage.

XVIII.4.73 To the Fathers with Soma, svadhā (and) homage.

XVIII.4.74 To Yama with the Fathers, svadhā (and) homage.

XVIII.4.75 Here is the svadhā for thee, O great-grandfather and for them that are after thee.

XVIII.4.76 Here is Svadhā for thee, O grandfather, and for them that are after thee.

XVIII.4.77 Here is svadhā for thee, O father.

XVIII.4.78 Svadhā to the Fathers that sit upon the earth.

स्वधा पितृभ्यो अन्तरिक्षसद्भ्यः ॥७९॥
स्वधा पितृभ्यो दिविषद्भ्यः ॥८०॥ (१७)
नमो वः पितर ऊर्जे नमो वः पितरो रसाय ॥८१॥
नमो वः पितरो भामाय नमो वः पितरो मन्यवे ॥८२॥
नमो वः पितरो यद्घोरं तस्मै नमो वः पितरो यत्क्रूरं तस्मै ॥८३॥
नमो वः पितरो यच्छिवं तस्मै नमो वः पितरो यत्स्योनं तस्मै ॥८४॥
नमो वः पितरः स्वधा वः पितरः ॥८५॥
येऽत्र पितरः पितरो येऽत्र यूयं स्थ युष्मांस्तेऽनु यूयं तेषां श्रेष्ठा भूयास्थ ॥८६॥

स्वधा । पितृऽभ्यः । अन्तरिक्षसत्ऽभ्यः ॥ ७९ ॥

स्वधा । पितृऽभ्यः । दिविसत्ऽभ्यः ॥ ८० ॥

नमः । वः । पितरः । ऊर्जे । नमः । वः । पितरः । रसाय ॥ ८१ ॥

नमः । वः । पितरः । भामाय । नमः । वः । पितरः । मन्यवे ॥ ८२ ॥

नमः । वः । पितरः । यत् । घोरम् । तस्मै । नमः । वः । पितरः । यत् । क्रूरम् । तस्मै ॥

नमः । वः । पितरः । यत् । शिवम् । तस्मै । नमः । वः । पितरः । यत् । स्योनम् । तस्मै ॥

नमः । वः । पितरः । स्वधा । वः । पितरः ॥ ८५ ॥

ये । अत्र । पितरः । पितरः । ये । अत्र । यूयम् । स्थ । युष्मान् । ते । अनु । यूयम् । तेषाम् । श्रेष्ठाः । भूयास्थ ॥ ८६ ॥

XVIII.4.79 Svadhā to the Fathers that sit in the atmosphere.

Pitarah

XVIII.4.80 Svadhā to the Fathers that sit in the sky.

XVIII.4.81 Homage, O Fathers, to your refreshment; homage, O Fathers, to your sap.

XVIII.4.82 Homage, O Fathers, to your terror; homage, O Fathers, to your fury.

XVIII.4.83 Homage, O Fathers, to that of yours which is terrible; homage, O Fathers, to that of yours which is cruel.

XVIII.4.84 Homage, O Fathers, to that of yours which is propitious; homage, O Fathers, to that of your's which is pleasant.

XVIII.4.85 Homage to you, O Fathers; svadhā to you, O Fathers.

XVIII.4.86 They who are there, O Fathers – Fathers there are ye – (be) they after you; may ye be the best of them.

य इह पितरो जीवा इह वयं स्मः । अस्माँस्तेनु वयं तेषां श्रेष्ठा भूयास्म ॥८७॥
आ त्वाग्न इधीमहि द्युमन्तं देवाजरम् ।
यद्घ सा ते पनीयसी समिद्दीदयति द्यवि । इषं स्तोतृभ्य आ भर ॥८८॥
चन्द्रमा अप्स्व१न्तरा सुपर्णो धावते दिवि ।
न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ॥८९॥ (१८)

ये । इह । पितरः । जीवाः । इह । वयम् । स्मः । अस्मान् । ते । अनु । वयम् । तेषाम् । श्रेष्ठाः । भूयास्म ॥
आ । त्वा । अग्ने । इधीमहि । द्युऽमन्तम् । देव । अजरम् । यत् । घ । सा । ते ।
पनीयसी । सम्ऽइत् । दीदयति । द्यवि । इषम् । स्तोतृऽभ्यः । आ । भर ॥ ८८ ॥
चन्द्रमाः । अप्ऽसु । अन्तः । आ । सुऽपर्णः । धावते । दिवि । न । वः । हिरण्यऽनेमयः ।
पदम् । विन्दन्ति । विऽद्युतः । वित्तम् । मे । अस्य । रोदसी इति ॥ ८९ ॥

॥ इत्यष्टादशं काण्डम् ॥
[सूक्तानि ४, मन्त्राः २८३]

XVIII.4.87 They who are here, O Fathers – alive here are we – (be) they after us; may we be the best of them.

Agni

XVIII.4.88 Thee, O Agni, would we kindle, full of light, O god, unwasting; as that very wondrous fuel of thine shall shine in the sky, bring thou food for thy praisers.

Candramā : the moon

XVIII.4.89 The moon among the waters runs, an eagle in the sky; they find not your track, O golden-rimmed lightnings; know me as such, O firmaments.

Here ends Kānda XVIII
Hymns 4, Verses 283